Tulsiramjee
Ganga Stotram
गंगा स्तोत्र
Sanskrit
Paper — Printed
Sambat 1934 (141 years old)
25 folio
13.2" x 6.5"
Complete

अथ गंगास्तोत्रं प्रारभ्यते.



॥श्रीगणेशायनमः॥ ॥प्रणम्याद्यांगंगांहृतविकृतिकामादिचरितांशुभांशुद्धांबुद्धान्दुरितभरभंगार्थमुदिताम् मुदे
टीकांकुर्वेस्वकृतिविवृतिंबुध्यहृदयेसुबोधान्तेभूयान्ममहृदियथाशङ्करसदये १ तुलसीरामनामाहन्त्वष्टश्लोकस्यतोषि
णीम् हरिगङ्गाशुतोषार्थंटीकांकुर्वेघनाशिनीम् २ सदेवसोम्येदमग्रआसीदितिश्रुतेः सृष्टेः पुरासद्रूपम्ब्रह्मतदेवस्वा
ध्यस्तमायाद्वारीकृत्यानेकब्रह्मांडाधिष्ठानभूतंसदादावन्तेचावधिभूतमपिमध्येमाययास्वरचितब्रह्मांडान्तर्वर्तिजीव
कल्पनयांडाद्बहिर्भाविजीवपापनिवृत्तिनिश्चयंकृत्वामायीसत्संकल्पत्वादन्यकल्पनयामूर्तिकर्तृत्वाभावेपितत्सृष्ट्वात
देवानुप्राविशदितिश्रुतेर्जीवेऽविद्ययौपाधिकरूपभिन्नेशास्त्रप्रवृत्त्यर्थंभक्तत्वंकल्पकत्वञ्चपरिकल्प्यतत्कल्पनयातत्रा
णार्थंहरिरूपोबभूव सचांडाद्बहिर्भक्तमध्येयतांप्राप्तोपिकारणहरिः पुनरंडांतेभक्तभक्ततरध्येयस्वरूपप्राप्त्यर्थं
कृतानेकवराहनृसिंहादिपूर्वापेक्षितकार्यमूर्त्तिरपिस्वतिरोधानेनानित्यतांसच्चिदानंदभिन्नकल्पितदृश्यस्यदर्शयन्स्व
पूर्वमूर्त्तिनिरोधानकालमारभ्ययावदन्यमूर्त्याविर्भावकालेक्लिश्यमानस्वभक्तजनोद्धारेच्छयासदाचसर्वजनोद्धारे
च्छयासनातनींजलमूर्त्तिंनिर्गुणोपासकानामप्याक्लादिनींमनसास्वीकृतवान्पूर्वंततोंडेशिवगाननिमित्तसाक्षाज्ज-
लमूर्त्तिःसन्धामनपादभिन्नांडेवततारतमेववस्तुत्वेनाशीर्वादनमस्कारवस्तुनिर्देशभेदत्रिविधमंगलेषुवस्तुनिर्देशा
त्मकमंगलत्वेनचप्रकटयन्मंगलानांचमंगलमितिस्मृतेरन्यमंगलापेक्षयावस्तुनिर्देशमंगलस्यैवमंगलमंगलत्वेन १
मुख्यत्वात् व्यवहृतयेविकल्पइषितोंधपरंपरयेतिश्रुतेर्व्यवहारभेदेपिपरमार्थेवाच्यार्थपरित्यागेनपूर्वोक्तेश्वरल-

क्ष्यार्थेनतदुपासकलक्ष्यस्यैकरूपंविषयंचस्तुतिप्रकरणेनप्रतिपाद्यप्रतिपादकरूपसंबंधंचाज्ञाननिवृत्तिपूर्वकपर
मानंदात्यंताविर्भावरूपंप्रयोजनंचतत्कामंचाधिकारिणंदर्शयन्नर्थादुपक्रमादिषट्लिंगंचसर्वत्रप्रकरणेप्रकरणप्र
तिपाद्यस्यैवयुक्त्यादिप्रतिपादितस्यदर्शनेनदर्शयन्नंतर्यामित्वेनज्ञातसर्वस्यापितस्यैवाग्रेपूर्वार्ध्यस्तुत्यातानेव
फलवतोवलोक्यान्यफलानित्यतांचाज्ञायसकार्याज्ञाननिवृत्तिंचेच्छन् स्वस्यात्यंतभक्ताभीष्टकृतनानामूर्तेरपित-
स्यैवात्रगंगामूर्तेरैश्वर्यवर्णनंयथामतिह्यष्टश्लोकस्तोत्रेणकरोति तत्रस्रग्गीतिमित्याद्यश्लोकेनपूर्वंब्रह्मणःपश्चाद्ध
रेस्ततोमनसाकृतजलमूर्तेर्बहिरेवसाक्षाज्जलमूर्तित्वेकारणंवदन् ब्रह्मांडांतःप्रवेशप्रकारात्मकैश्वर्य्यमाह ए
वंहिपुराणेकथाश्रूयते कदाचिच्छिवोन्यांश्छिक्षयन्मनसःस्थिरीकरणार्थंसामगानंकृतवांस्तच्छ्रुत्वादेवाजलाकृ
तिमगच्छन् एतच्चविष्णुरप्यंडाद्बहिरेवश्रुत्वापूर्वापेक्षितजलाकृतिरभूत्तथैवाह हरिरपिब्रह्मांडाद्बहिरेवपुरारि
मुखोत्पन्नांस्कलभसामगीतिश्रवणंहेतुंकृत्वाजनोद्धाराम्भांनीराकृतिमकृतेत्यन्वयः कृत्वाचशरणगमनंय-
थास्यात्तथावामनपदेनिमित्तंधृत्वांडंभित्वाचांतःप्रवेशमात्रेणसरिदभूदित्युत्तरार्द्धान्वयःशेषपदाद्बोध्येतएव
हरिपदीतिसंबोधयन्ध्रुवस्थानेस्रुयातेत्यवशिष्टान्वयेस्त्रीत्ववदग्रेपिहरिरूपसरितःस्त्रीत्वेनैवसंबोधनादिकंभ
विष्यतीतिबोधयति ननुसद्धरिसरितांलिंगभेदाद्भेदेकथंब्रह्मणोहरिताहरेश्चसरिद्रूपतेतिचेन्नचिच्चैतन्यंचिति
रितिपर्य्यायाणांलिंगभेदेपियथैकार्थत्वंतथैवसदादीनामपित्रयाणामभेदएवैकार्थत्वेनस्यान्नचैकशब्दपर्य्याया

णामेव चिदादीनां लिंगभेदेप्येकार्थत्वेनाभेदोस्तु नान्येषामिति वाच्यं भिन्नशब्दानामपि घटकलशादीनामेकवाच्यवा
चकत्वेनाभेदश्रवणान्न च सन्हरिसरिन्निष्ठसत्वेन सदादीनामभेदेपि त्रिषु चिदन्वयाभावे तयोरन्वयश्रवणाभावेच सन्नि
योगशिष्टपरिभाषया सत्वेन त्रिषु सतः केवलस्य स्तुत्यत्वाभाव इत्यपि वाच्यं सदन्वयिचैतन्ये मायात्मवीर्याभावसा
म्यात्षंडत्वेन मायावति हरौ मायायां महत्वात्मक गर्भस्थापकत्वाच्चिदभिन्ने पुंस्त्वेन चित्यभिन्नायां सरिति स्त्रीत्वेन लिं
गाभेदद्वारा पर्यायार्थचितोपि चित्वेन सत्यन्वयादत एव लिंगभेदेपि सच्चिदोस्सर्वत्रैक्यात्तयोरेव सर्वत्र मुख्यस्तुत्यत्वा

स्रुगीतिं ब्रह्मांडाद्बहिरपि पुरारेरसुलभां
मुखाच्छ्रुत्वा साम्नां हरिरकृत नीराकृतिमभां

दुपक्रमोपसंहारयोर्लिंगभेदात्तत्स्वरूपकथनं न दोषायार्थात्पूर्वं प्रतिपादितैक्यवदन्यत्रापि शब्दस्फोटादिभेदे
सच्चिदोरैक्यमेवेति भावार्थायास्तीत्यर्थः ननु जनोद्धारामिति नीराकृतिविशेषणेनैव सामान्यसर्वोद्धारसिद्धाव भा-
मिति विशेषणे विशेषणानुक्तौ विवक्षितान्वयबोधकात्मकसमास पुनरात त्वदूषणमिति चेन्न हरेस्सर्वेषां स्वभक्तजनाना २
मेवोद्धारो यस्यास्ताहशाकृतेरन्यात्मकाकृतिकरणार्थत्वाभावेपि भक्तानां नान्यद्भाद्दीप्तिर्यस्यास्तामिति बहुव्रीहिणा

र्थवद्भामितिविशेषणेनानूपबोधाद्भक्तानांचसाक्षाज्जलरूपेपिहरौनभातीत्यभामितितत्पुरुषार्थस्वीकरणेनज
लसामान्यज्ञानादज्ञतोद्बोधनेनतस्याप्यावश्यकत्वात्स्कगीतिमित्यत्रादिसुनागीतेः श्रेष्ठत्वेप्यसकलभामितिविशेषणे
नतत्प्राप्तेरपिदुर्लभत्वंबोधितंहरिरपीत्यत्रापिनचान्यदेववन्हरेर्जलाकृतिकरणेशिवकर्तृकसामसुगीतेरेवोत्कृष्टत्वंहरेश्चद
यार्द्रचित्तस्यजलरूपकरणेनदयाविष्करणत्वंचसर्वोद्धारद्वाराद्योत्यतेपुरारिशब्देनचपुरारेर्यथात्रिपुरदाहकत्वंतथैत
ज्ञानहेतुकजलाकृतिहरेस्त्रिपुरसदृशत्रिदेहदाहत्वंस्वसेवादिद्वाराध्वनितंमुखादित्यनेनमुखेनवैखर्यात्मध्वनेरन्यध्वनि

जनोद्धारांध्रत्वाशरणगमनं वामनपदे
निमित्तम्भित्वांडंहरिपदिसुयाताध्रुवपदे १

गानांभावश्चसाम्नामितिपदेन गानंतुसाम्नामेवान्यत्रशरणगमनेप्यत्रशरणगमनस्यास्याः स्थितेरन्यापेक्षयास
नातनत्वात्सर्वदाविधानत्वंवामनपदांडभेदेपिहरिकर्तृकांडभेदेनहरिवामनयोरैक्यविधानद्वारातिदृढांडभेदेनोभयत्र
भक्तदयाविष्करणेनचांतःप्रवेशेनान्यहेतुत्वंहरिपदंनिमित्तीकृत्यजाताहरिपदीतिनाम्नातदानीमन्यनामानुत्पत्तिश्चसुया
तेत्यत्रस्रुनाध्रुवसौहार्देनयातेत्यर्थश्चातएवस्वपदेपिध्रुवपदइतिनामविधीयतइतिश्लोकसर्वपदार्थोज्ञेयः १

एवंभगवतोजलाकृतिविधानंसहेतुकंविधायहरिपदीतिनामविधानवद्ध्रुवलोकान्यलोकस्थपवित्रतयारक्षापूर्वकनत्तल्लोकप्राप्तिनिमित्तकाले
कनामविधानंसंबोधनैः प्रकटयैस्तदैश्वर्यंबहुलोकगमनादिरूपंवर्णयति स्खलंतीत्यनेन पूर्वंहरिपदीतिवद्ध्रुवपदप्राप्त्याहेध्रुवप
दितस्यध्रुवस्यलोकात्स्खलंती ऋषीणां प्रीत्यातिवेगेनचलंती ऋषिगणस्यपदंस्थानमृषिमंडलं प्राप्तानुतश्चपयसास्वस्थानस्थि
तानामेवप्रीत्यातत्तत्स्थितिपदमभिव्याप्यर्क्षस्थानमृक्षमंडलंतद्दीस्येगतेति पूर्वशेषः ऋषिमंडला यथार्क्षेतथैवार्क्षस्थानादिं दुंहि
तदोषायरभसावेगेनगतेत्यन्वयः ऋषीणांसर्वश्रेष्ठगुणानांपृथक्स्प दव्याप्त्यान्यलोकेषुतत्तच्छुद्ध्यर्थमेवतद्गमनमितिव्याप्यपदा
र्थः पुनश्चाजस्यायमाजोलोकस्तंपुनंतीहारंहरलोकंचतस्थ्वात्पुनंतीहेमंदाकिनितदनुनयेइतिनिमित्तसप्तमीनयनंस्वप्रा-
प्तिसाधनमनेकजन्मभिरर्जिततपोयागादिनयस्तंतेषांनिमित्तंविधाय भुवितानेवसम्यक्स्वसेवोपासनज्ञानादिद्वारासंसारादुद्ध

स्खलंती तल्लोकादृषिगणपदं व्याप्य पयसा तथार्क्षाणां स्थानाद्ध्रुवपदिगतं दुंहि रभसा
पुनंत्यार्ज्यं हारं तदनु भुवि मंदाकिनि नये समुद्धर्तुं प्राप्ता हिमगिरितटं जह्नुतनये ॥ २

र्तुंहिमस्संबंधिगिरेस्तटंशिखरंप्राप्तानिमित्तमंतरातदुद्धारकर्तृत्वेसाधनवैयर्थ्यंकर्मसापेक्षत्वादिनिसूत्रविरोधश्चस्यादतए
वसाधनवैयर्थ्योपलक्षितकृतनाशाकृताभ्यागमदोषद्वारासूत्रविरोधपरिहारेणहिमगिरितटमित्युक्तापिप्राप्तानामप्रकर्षेण
तटस्थर्षिगणादिकृतानेकयागादिरूपेणैवाप्राप्त्यासेति बोध्यं जह्नुतनयेइतिसंबोधनेनजह्नुनापीतानिसृतानिचभगीरथप्रा
र्थनयेतिक्रमेणतयोस्तपोबलदयाकिंकरणत्वेनचतदैश्वर्यमुद्बोधितमन्यथाकोनिरुंध्यान्नयेद्वागंगांतनयत्वंतुकृष्णादिव
द्बोध्यं ध्रुवलोकान्यलोकप्राप्त्यानामान्यन्यान्यपीत्थमृषिपद्यृक्षपदींदुपदीब्रह्मपदीहरपदीजह्नुतनयेत्यादीनिस्थानतत्स्थानां ३
बहुत्वात्तत्तन्निमित्तकानिज्ञेयानिमंदाकिनीतितुदिविमंदाकिनीत्युक्तेर्दिविसर्वत्रसामान्यमित्यर्थः ॥ २

ध्रुवादिहरलोकान्तकारक लोकेषु तदादिहिमतटांतर्गतजह्नुपदांतकारकसाधारणजनपदेषु चक्रमेण जनस्मरणाद्यर्थमनेकनामोपलक्षणनामानि सनिमित्तान्युक्तानि तदन्यत्र भुवि पाताले च तन्नाम्नां सहेतुक निरूपणेन तद्दयालुत्वैश्वर्य्यस्मरणाद्यर्थमेव निरूपयतितटाद्गंगे इत्यनेन शिवादिसेवाद्वारा भगीरथेनानीतत्वाद्धे भागीरथि पुनरपि तटाद्धिमगिरितटाद्भुव्यनेकान्समुद्धर्तुमेव यान्ती गणान्पूर्वमनेकोद्धारेरपि शिवगणानां शास्त्रात्प्रसिद्धेस्तदुद्धारार्थं मुख्यत्वेन तत्र गतागतात्वाच्च स्वजलस्पर्शमात्रेणोद्धृत्य च तांस्ततोपि चकारार्द्धे आर्य्यैन्यसमुद्धारार्थं यांतीकृतानि यानिशतोपलक्षितानेकहितानि हितसाधनानि योगादीनिते निमित्ते र्मार्गे त्वदागमनमार्गे ये पतिताः इह पूर्वजन्मनि वाकृतसाधनाभावेत्वन्मार्गपतनाभावात्तान्समुद्धृत्य सगरजान्भगीरथप्रार्थनया मोक्तुकामा तान् गतेति पूर्वरूपशेषः पठनं च केषांचि

तटाद्गंगे यान्ती पुनरपि च भागीरथि गणान्समुद्धृत्यार्य्यैन्यान्कृतशतहितै र्मार्गपतितान्

द्देह भस्मादिना केषांचित्स्वधर्मत्यागात्ताहृशानामप्युद्धारेण यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन इत्युक्तरीत्यान्यकारकपतितरक्षणशिक्षणद्वारार्य्यसंबोधनोक्तार्य्यत्वापबोधनेन त्वाद्दोते दयालुतेति भावः कथंभूतान्सगरजान् क्रोधेन स्वशरीरोत्पन्नेनैवोज्वलितानि दग्धानि वपूंषि येषां तानप्यथाद्भिरेवार्थात्स्वजलस्पर्शमात्रेणैव विमोक्ष्यहें ब स्वस्वरूपकपिलेश्वरापराधात्स्वदोषवतामुद्धरणान्मातृरूपेतत्रान्यत्र च तथैवोद्धरणात्सर्वा बहेवाततो ये विवरनिकराः पातालभेदा ये च तत्र स्थितास्ताँश्च ताँश्च सर्वानपि स्वभक्तान् पातुं स्वसेवादिनैव स्वस्वरूपोपयबोधनेन संसाराद्रक्षितुं पूर्वमब्धिमगस्त्यपीतत्वाद्रिक्तं पूरयितुं स्वप्रवाहेण तत्स्थकल्याणद्वारा प्रविष्टा पश्चात्तु हे भोगवति तेषु याते त्यर्थः नन्वब्धिकर्तृकस्वावरोधस्वविवरप्रवेशविरोधमब्धिमार्गाद्बोधनेन परिहरंती विवरस्थान् पातुं विव

राणांजडानांकथंपावनमितिचेदीश्वराधिष्ठातृचैतन्याभिप्रायेणपावनंसर्वत्राधिष्ठातॄणामेवसुखादिफलप्राप्तिश्रवणादन्यथादि
काव्येवाल्मीक्युद्बोधितहनुमद्धेतुकलंकाहननंनस्यात्श्रूयतेचशास्त्रेदेहभस्मचर्मादिनांयज्जलसंगादेवसगरजादीनांतदधिष्ठातॄणामे
वपवित्रतानन्यस्त्वधिष्ठानस्यैवसर्वत्रफलवत्त्वं तथाप्युपाध्यधिष्ठानयोरत्यंतभेदात्कथमुपाधिफलेनाधिष्ठानस्यफलवत्त्वमिति
चेदुपाधिनात्यंतभिन्नस्यापिराज्ञोयथास्वदत्तधनसत्ताजातभृत्यकृतकर्मफलाधिकरणताश्रयत्वं तथैवस्वसत्ताप्रवृत्तप्रकृत्यभि
न्नजडोपाधिकृतकर्मफलवत्त्वमधिष्ठानस्यैवजडोपाधौफलाभोक्तृत्वेनस्यात्तथाचोक्तंभगवताकार्यकारणकर्तृत्वेप्रकृतिंकार
णंविदुः भोक्तृत्वेसुखदुःखानांकारणंपुरुषंविदुरितिनचस्वकृतमेवभुनक्तीतिवाक्यविरोधइतिवाच्यंस्वसत्ताप्रवृत्तकृतफलस्य

विमोक्ष्याम्बक्रोधोज्ज्वलितवपुषोद्भिस्सगरजान्प्रविष्टाब्धौ पातुं वि वरनिकरान्भोगवतियान् ३

स्वफलत्वात् वस्तुतस्तुप्रातीतिकसत्वस्वीकारेचोपाधेः कल्पितत्वात्किंचित्करत्वनियमात्स्वस्यचसुखादिरूपत्वान्नान्यफलेनफल
वत्त्वंतत्कथनंतुव्यावहारिकसत्वेनव्यवहारपरमार्थयोःपृथक्त्वेमानंतुभवत्याभेदोनोइत्यस्मिन्श्लोकेस्फुटीभविष्यति यथात्रतथाज
लोकादिष्वपियथानुकूलंलोकाधिष्ठातॄणांतत्पतीनांचपावनकर्तृत्वंगंगायाज्ञेयंयथाभगीरथसेवयाभागीरथीतथागणोद्धार
कृणोद्धर्त्रीसगरजोद्धर्त्रीसर्वोद्धर्त्रीत्यादीनितत्तदुद्धारनिमित्तनामानिभुव्येवस्मरणाद्यर्थार्थसाधारणान्यार्य्यावादीनित्रिलोक
साधारणानिमंदाकिनीतितुदिव्येवदिवीत्यस्यभोगवतीतिचाधोगंगेतिचेहचरणांबुपुनातिविश्वमितिशेषवाक्याद्गंगेतिभूमात्रे
सर्वत्रसाधारणंभोगवतीतितुसर्वविवरेष्वसाधारणंस्मरणाद्यर्थमेवनामेतिदिक् ३ छ छ

एवंस्कगीति मित्यादि त्रिभिः श्लोकैर्जलाकृतीश्वररूपगंगायाः सबीजोत्पत्तिद्वारानत्तन्निमित्तोत्पन्ननामस्मरणादिभिः सर्वोद्धारनिरूपणेन सर्वलोकेषुपवित्रताद्वारा रक्षाद्यात्मकतदैश्वर्य्यमुपवर्ण्यतदनुवादपूर्वकं पुनस्तदादिरूपप्राप्तिंतस्याः कथयन्सत्ताजलोभयरूपस्यत्रिषुव्याप्त्याव्यापकरूपायास्तस्याएवार्येस्वाभिप्रायंनिवेदयति गतानेवमितिश्लोकेन हेसंवित्सम्यक् ज्ञानेनसर्वज्ञे एवंरीत्यात्रिषुलोकेषु गतान् जीवनिवहान्समूहान्समुद्धर्तुं गतापिसत्ताजलोभयरूपेणपुनस्तेनैवस्वमाद्यंरूपमगादित्यहोतेविलक्षणव्यापकतेत्यन्वयः ननुकिन्निमित्तंजीवानांलोकगमनमित्यतआह मतिमतैरिति मतेर्बुद्धेर्मतानिजीवेज्ञातानिसत्वा

गतानेवंलोकेष्वथमतिमतैर्जीवनिवहान्समुद्धर्तुंसंविच्चिषुपुनरहोगात्स्वनिरयान्

दीनितैर्निमित्तैरित्यर्थः तथाहभगवान् ऊर्द्ध्वंगच्छंतिसत्वस्थामध्येतिष्ठंतिराजसाः जघन्यगुणवृत्तिस्थाअधोगच्छंतितामसाइति किंभूतंरूपं स्वमहिमनिर्वासितगुणं स्वमहिम्नासत्तास्फूर्त्याख्येननिर्वासितानिर्मूलिताः कार्य्याक्षमतांगमितागुणाःसत्वादयोयस्मिंस्तत् नचादिपश्चान्मूर्त्येकत्वेनसत्वस्याप्यात्मन्यभावेकथंसत्वात्मिकमूर्त्तिस्तदभावेचकथंस्तुतिस्तदभावेचकथंसाधनाभावान्मोक्षइतिवाच्यं द्वेधाहिगंगारूपविष्णोर्मूर्तिः निर्गुणंनिरंजनमितिश्रुतेर्निर्गुणरूपा परमंपुरुषंदिव्यमितिस्मृतेर्नित्यदिव्यसत्वरूपाचतत्रैकयाद्यो निर्गुणयास्वरूपस्यनिरुपाधिकवास्तवत्वंद्वितीययादिव्यगुणयापूर्वोक्तदोषाभावश्चबो

ध्यतेतएवैकत्वादिमूर्त्तौसर्वगुणाभावेपिपश्चाद्दिव्यसत्वमूर्त्यासर्वमलिनगुणान्दूरीकुर्वन् गतापुनरादिरूपमित्युक्तेः नन्वस्तुरजस्तम
सोर्मलिनताहेतुत्वाद्दिव्यमूर्त्यारजस्तमः प्रधानलोकगमनेनतद्दूरीकरणंसत्वस्यतुकथंसत्वंसुखेसंजयतिसात्विकंसुखमात्मोत्थं
सात्विक्याध्यात्मिकीश्चेत्यादिभगवद्वाक्यैः सुखादिसंयोजकत्वेनश्रेष्ठत्वाद्दूरीकरणंकिमर्थंचसत्वप्रधानलोकगमनमितिचेन्नसापे
क्षश्रेष्ठत्वेपिसुखसंगेनबध्नातिज्ञानसंगेनचानघेतिभगवद्वाक्यादेववस्तुतोलोहसुवर्णशृंखलयोर्बंधकत्ववत्सर्वेषांगुणानांबंधक
त्वाविशेषात्तद्दूरीकरणंतदर्थंचसत्वप्रधानलोकगमनमुचितंगंगायाश्चथचत्वंतुस्वमनसास्वस्थानस्थितैवसर्वान् रक्षितुंसमर्थातथापि

गताद्यंस्वंरूपंनिजमहिमनिर्वासितगुणंगतंस्वाद्यैश्श्रुत्वाकुरुकुरुदयांदेहिशरणम् ४

भक्तवात्सल्यद्योतनार्थंसर्वलोकेषुगताथाहंतुस्वकर्मकृतलोकेषुनिरयतुल्येषुभारतेशांतिपर्वणिदुःखप्रदसातिशयादियुक्तत्वादा
त्मावलोकनव्यतिरिक्तत्वेनापिनिरयत्वेनप्रतिपादितेषुगतोबहुजन्माभिप्रायेणबहुत्वंतंमांसर्वज्ञापिस्तुतिसंप्रदायार्थंश्रुत्वाममो
परिदयांकुरुकुर्वितिशीघ्रार्थेवीप्साशरणंचदेहिनिरयदूरीकरणद्वारेतिप्रार्थनाभिप्रायः नन्वन्यैर्लोकेषुपातितोद्यपूर्वंचतद्दंडद्वारादया
शरणादीच्छसिकिमतआह स्वाद्यैरिति तत्रापिस्वाद्यनिमित्तेनाहमेवगतोलोकेष्वतोघकर्तृकपातनमपिस्वशब्दान्मतस्तथामत्कर्तृक
मेवकुतोन्येषांदूषणमित्यर्थः त्वंतुस्वान्याद्यैः पतितान्पातितांश्चापिपास्यतः मच्छरणप्रार्थनंदययासफलंकुर्विति भावः ४

गंगाभिन्नविष्णोस्तिस्रो मूर्त्तयो भवंति साक्षान्मूर्तिसंकल्पमूर्त्याकाशवाङ्मूर्ति भेदात् प्रह्लादादिस्तुत्यनृसिंहादिसाक्षान्मूर्त्तयः यदाह वै पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठंति संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः व्रत नियमधर्माश्च सर्वे संकल्पजाः स्मृता इति श्रुतिस्मृतिज्ञापकात्संकल्पतदुत्पन्नैक्याद्यज्ञोपलक्षित विष्णु संकल्पमूर्त्तयः ब्रह्मनारदादि वरदानादाकाशवाङ्मूर्त्तयश्च तत्रात्यंत पुण्यमंतरा भयोरावि र्भावा भावे गंगातो दूरदेशे स्रोतसत्तियुतलोकगमनेन लोकरक्षणरूपमैश्वर्य्यं स्वस्योपश्रुत्य संकल्पमूर्त्याशंकते गंगातत्सरीक्षाद्वारा तयैव फलदानाय गतादावित्यनेन ननु ममैश्वर्य्यवर्णनेन दयति हि नस्त्यज्ञानं ददाति च ज्ञान मनयेति दयाभृणाति विपक्ष भय मनेनेति शरणमागतसमीपकरणमित्युभयमिच्छसीति ज्ञातं तथापि त्वयैव पुनरादिरूपगमनविधानात्तत्र गताव्यवधानेनेह भुवि स्थितं त्वां कथं केन प्रकारेण रक्षे इति त्वं वदेत्याशंकितः संबोधनेनैव तद्व्यापकतां वर्णयन्समाधत्ते हे मालाकारे मालावद्गमना गमनरूपेणान्यावता

गतादौ रूपेत्वां कथमिह नु रक्षे वद भुवि श्व हो मालाकारे त्रिषु न हि गता किं व द ग वि
वियुक्तं स्वाद्यैस्त्वामिह न हि विमोक्ष्ये कथमलं तदा मुक्तौ गच्छे दृषिगणकृतासेस्तुतिरलम् ५

रापेक्षयापि विलक्षणव्याप्तिमतितस्मादहो इत्यव्ययं चेदर्थं ब्रुवदाश्चर्य्यं वक्ति त्रिषु लोकेषु किमिति प्रश्नोत्तरे गविजले सत्तारूपेण न गता हि निश्चयेन गताव्याप्तैवातस्तत्र तत्र गतं मां रक्षेत्यर्थः ननु ब्रह्म वैवर्तोक्ति मालावद्गमनागमन विलक्षणव्याप्त्या प्रार्थनया रक्षेच्छितायासा तु परित्राणाय साधूनामिति वाक्योक्त साधूनामेव त्वां तु स्वाद्यैरनेकजन्मार्जितैर्न हि वियुक्तं कथं विशेषेण मोक्ष्ये तत्राप्यज्ञान निवृत्त्यालमत्यर्थं मिति पुनराशंकितो मुक्त्यन्यथानुपपत्त्या समाधत्ते तदेति तदानामश्रेष्ठतरयत्किंचित्साधनस्याप्यस्वीकारे स्तुत्यादिसाधनाभावाद मुक्तिः स्यादस्त्वन्येषां सेति चेदृषिगणकृतापि ते स्तुतिर्मोक्षानुपयोगिनी स्तुतित्वाविशेषात्सती गच्छे दूरे इति शेषः नश्येदिति पाठे नाशमदर्शनं गच्छेद्यत्किंचिदिति चेदाहालमिति ऋषीणां त्वद्रूपत्वात्तत्कृत स्तुत्य भावे तवापि स्तुत्यत्व क्षतिः स्यादिति भावः ५ ६

किंच पुनः सर्वर्षिगणस्तुतिस्तुत्याभावमपि तत्परीक्षार्थमेवांगीकरोति तथास्तामित्याद्यक्षरैः चेदन्द्वांगीकारार्थेनाहंमत्वा पुनः समाधत्ते हे हरिकले हरिवत्कलागणनाश्रेष्ठेषु यस्यायद्वा दिहरोमालावद्गमनागमनवर्णनेन कलाप्राप्तिर्यस्यायद्वा हरिवत्पापनाशिनी कलागतिर्गमनं सर्वत्र यस्यायद्वा हरिवत्कलाज्ञानंज्ञानस्वरूपंव्यवहारे दिव्यज्ञानं वा यस्या हे हरि सर्वस्वरूपे सर्वस्तुतिस्तुत्याभावे निर्हेतुकरक्ष्यरक्षकाभावाज्जगदांध्यं हे भवति सर्वप्रमाणादिकारणभूते स्यात्पुनस्तदपि तथैव स्वीकरोति गंगा तदपि जगदांध्यमस्यास्तां किं मम निरपेक्षाया जगदांध्येनेत्यर्थः पुनश्चेतः सत्यार्थत्वेहं मत्वातिपतितोद्धारान्यथानुपपत्त्या समाधत्ते यद्यप्यन्ये साधारणान्नक्षितुं समर्थास्तथापि पतितान नेकदोषैर्मार्गाद्भ्रष्टान्विमले तत्रापि स्फुविमले पथीति शेषः कस्त्वदन्यो नयेत्स्तुत्यादिसाधनैरतः पूर्वदोषान्ध्नंतीयदिद्वयं

तथास्तामास्तांचेद्भवतिजगदान्ध्यंहरिकले नयेत्कोन्यो मार्गे तदपि पतितांश्चेत्स्फुविमले
पुरासद्भिः सद्भिः स्तुतिरपि कृतेत्वाहिमनसाब्रुवे हार्दंस्मातश्शृणुकुरुसमाज्ञायवचसा ६

नवर्त्तेयंजातु कर्मण्यतंद्रितः सृष्टिपूर्वकवर्णाश्रमधर्मधारणरक्षणफलदानादिकर्मणीत्यर्थः ममवर्त्मानुवर्त्तंते मनुष्याः पार्थ सर्वशः शंकरस्य च कर्तास्यामुपहन्यामिमाः प्रजा इत्यादित्वदभिन्नभगवद्वाक्यसमाधानपूर्वकसंप्रदायार्थप्रवृत्तर्षिस्तुति वदन्येषां स्वार्थस्तुतिमपि सफलां कुर्विति भावः किंच तव निरपेक्षसाम्याद्विनगमनाभावाच्च श्रेष्ठाश्रेष्ठकृतस्तुतावपि नाग्रहो युक्त इत्याहेन हे मातः श्रेष्ठाश्रेष्ठसर्वस्तावकपुत्रेषु मातृवत्समे पुरादौ सद्भिः सनकादिभिः ननु तपसः सिद्धिरेतावतीत्यादिवाक्येनादरपूर्वकान्योपदेशार्थमसद्भिरपि स्वकल्याणार्थं ते स्तुतिः कृता चेत्तीत्वाज्ञात्वाहमपि हार्दं हृदभिप्रायं वचसोपि पवित्रार्थं वचसा त्वदग्रे ब्रुवे कथयामीत्यर्थः नच दयाशरणमेतद्धार्दमितिवाच्यं तद्द्वारान्यस्यापि प्रार्थनीयत्वदर्शनादतः सर्वज्ञापि त्वं पूर्वार्थ्यरीत्या शृणु श्रुत्वा च कुर्विति प्रार्थनायां लोट् ६ ६

एवं प्रार्थनया ध्येयैश्वर्य्यवर्णनात्मकस्तुतिं स्तुत्य भावादिदोषपरिहारेण संकल्पमूर्त्तिध्येयस्वीकृतामयेप्रभ्मादर्शनात् मत्वास्वहार्द मेव कथयतिस्वमित्यनेन हे हरिचरण संसर्गशुभगेहरेर्वामनस्यचरणसंबंधाच्छुभापि पुनरतिशयेन शुभं साधननिरपेक्षजनोद्धाररूपं गतेतिगातत्संबुद्धौ यद्वा हरिचरणेपिस्वसंसर्गाच्छुभं सर्वत्रकीर्त्तिरूपं गच्छति जानातिगमयतीतिवासुभगेइति पाठेतुहरिचरण संसर्गात्सुष्टुभगंषडैश्वर्य्यरूपं गतेतिकेवल विष्णुभक्तापेक्षितोर्थः सर्वथापिहेश्रेष्ठे तेत्वया कलौसाधनाभावं दृष्ट्वेहजन्मन्यन्यत्र वाकृतं यत्किंचित्साधन साधनं मत्वास्वस्तुति फलस्य त्वय्यर्पणेनाद्यहिताच्चिवर्गादपि हिततरं स्वसंनिधिद्वाराशुद्धस्वरूपबोधरूपं कार्य्यं कर्तुं

स्वमालोच्यालोच्यं शिरसिचरितम्मे हितकरं करन्दत्वाकार्य्यं स्मरतरुसमं ते हिततरम्

योग्यमेव किंकृत्वामेममशिरसिकरं दत्वास्थापयित्वाकरस्थापनं विनात्वत्कृतदयाशरणस्याप्रतीतेः हिततरकरणेपिसंशयः स्यादतस्तन्निवृत्त्यात्तथैवकार्य्यं ननु संकल्पमूर्त्यातथैवसंकल्पेन कृतमितिचेदस्तु संकल्पेनैव त्वत्करस्थापनं तत्प्रतीतिस्तुत्वत्सामीप्यादिना तस्तदेवकुरुपूर्वममतत्प्रतीत्यर्थमिति भावः किं भूतं करं स्मरतरुसमं भक्तापेक्षितफलदानेनस्मरतरोः सममत एव भोगमंतरारब्धकर्मक्षयाभावात्स्मरतरुवदु भयथाशुभाशुभ फलदानेनापिहितकरत्वाद्धितकरमिति विशेषणं संगच्छते दृढतरकर्मणायत्किंचित्साधनस्याप्यवरुद्धत्वात्कथं श्रेयः कार्य्यमितिचेत्त्वं स्वकीयं साधननिरपेक्षं चरितं सर्वपतितोद्धर्तृरूपमालोच्य

निरपेक्षत्वान्नालोचयामीतिचेन्ननिरपेक्षनिर्गुणरूपेणानालोचनेपिसगुणेनसर्वोद्धर्तृचरितंत्वालोच्यमालोचयितुंयोग्यमेवान्यथा सर्वधर्मान्परित्यज्यमामेकंशरणंव्रज अहंत्वासर्वपापेभ्योमोक्षयिष्यामिमाशुच इतिसाधननिरपेक्षदिव्यमूर्तिभगवद्वाक्यासंगतिःस्यादितिभावः अथचेज्याचारदयाहिंसादानस्वाध्यायकर्मणाम् अयंतुपरमोधर्मोयद्योगेनात्मदर्शनमितियाज्ञवल्क्योक्तपरमधर्मापरपर्यायरूपंस्वसंनिध्यादिद्वारास्वस्वरूपबोधात्मकंहिततरमपेक्षितंतत्तुधूमेनाव्रियतेवह्निर्यथादर्शोमलेनच यथोल्बेनावृतोगर्भस्तथातेनेदमावृतमावृतंज्ञानमेतेनेत्यादि भगवदुक्त्याज्ञानविरोधिभावरूपाज्ञानाच्छादितत्वात्सकार्यतन्निवृत्त्या भवत्य

प्रदाह्यातेत्वाङ्घे हरिचरणसंसर्गशफभगे प्रदग्ध्वातद्बीजंश्रुगतिपतितस्वान्ततुरगे ७

तःसकार्याज्ञाननिवृत्तिमपिप्रार्थयत्यर्द्धेन हेगंगेचपुनरंगेशरीरेमनसिवातेनिमित्तीकृत्याःस्मन्युत्पन्नेतिशेषः याशुक्सा प्रदाह्या प्रकर्षेणमूलोच्छेदेनदग्धुंयोग्येत्यर्थः कथंभूतेंगेमनसि अतिपतितस्वांततुरगे अतिपतितंमार्गादुत्कृष्टंस्वांतं तदेव मनः अदांतमनस्तुरगमितिश्रुतेर्दुर्दम्यत्वसाम्यात्तुरगस्तस्मिन्नचसैवकेवलेतिवाच्यंसतिकारणेतदनुच्छेदादित्याह तद्बीजंहेतुर्नाकारणंबीजमितिको- शात्कारणमज्ञानमेवतत्प्रदग्ध्वाप्रकर्षेणनिःशेषतयैवदग्ध्वापूर्वंपश्चादाभासरूपापिशुग्दाह्येत्यर्थः सकार्याज्ञाननिवृत्त्यनंतरंतुत्वद्दयादिद्वा ७
रोदेत्येवज्ञानरविरितिमद्वार्दार्थः अज्ञाननिःशेषनाशोनारब्धरूपतत्कार्याभाससमंतरासंप्रदायान्यथानुपपत्त्याबोध्यइतिभावः ७

ननुसाधननिरपेक्षानन्यताप्रसन्नभगवद्वाक्यासंगत्यवष्टंभेनसाधननिरपेक्षकेवलस्तुतिनामभिरेवसकार्य्याज्ञाननिवृत्तिस्तुभविष्यति
तथापिभगवदनन्यतोत्तरकालेनर्थाभाववत्स्तुत्यनंतरानर्थाभावद्वाराविधियुक्तस्तोतुरेवातस्त्वमपितथैवभवेत्यतआह शरीरादीत्यने
नहेगंगेगच्छतिसर्वत्रपवित्रार्थंगच्छतिजानातिभक्तानितिवा गच्छंतिप्राप्नुवंतिमुक्तिंययेतिवागच्छंत्यधिष्ठानरूपायांत्वयिगमनंकुर्वंति
सर्वइतिवागंगेतिनामोच्चारणसाधनमात्रेणैव गंगागंगेतियोब्रूयाद्योजनानांशतैरपि मुच्यतेसर्वपापेभ्योविष्णुलोकंचगच्छतीतिप्रा-
माण्याद्गमयतिप्रापयतिविष्णुरेवलोकस्तत्रभक्तान्वासर्वान्वेतिगंगातत्संबुद्धौहेगंगेस्तुत्यनंतरानर्थाभावतएवेष्टसिद्धिरितिसर्वत्रदृश्य
तेतथाप्यहंतुशरीरादिषुयोऽध्यासोनाद्यविद्याहेतुकस्तस्माद्धेतुतोकर्तृभोक्तृरूपेऽध्यात्मनिकर्तृत्वादिप्रतिपादकाद्धेतोर्येकथिता
गुणारागद्वेषादिद्वंद्वरूपास्तैर्यत्किंचित्स्तुत्यादिसाधनपूर्वापरकालेपियुक्तोस्मिनतुश्रेष्ठविधौसर्वत्राध्यासस्यैकत्वेपिकेषांचिच्छ्रेष्ठ-

शरीराद्यध्यासात्कथितगुणयुक्तोनतुविधौनशक्तःस्तोतुंत्वाग्रथितगुणनिस्तारणविधौ

विधिप्रवृत्तिस्तुसुकृतादीश्वरार्थप्रवृत्तशरीराद्यध्यासान्ममतुमलिनाध्यासवत्त्वाच्छ्रेष्ठविध्ययुक्तत्वंविध्ययुक्तत्वादेववर्णाश्रमविध्यंतर्ग
तस्तुत्यानशक्तस्त्वांस्तोतुंकथंतर्हिस्तुत्यभावादिदोषंपरिहरन्सकार्याज्ञाननिवृत्त्यर्थंकेवलस्तुत्यैवमामस्तोरित्याशंकितःअविधिनेवेत्य
भिप्रायवानाह ग्रथितगुणनिस्तारणविधाविति शरीरादीनामात्मनिस्वरूपाध्यासस्तत्रात्मनःकल्पितसंसर्गाध्यासस्तस्मादेववेदांते
बहुधाकथिताद्ध्यासाद्ग्रथिताःसंलग्नायेरागादिगुणास्तेभ्योनिस्तरणमेवनिस्तारणंतस्ययोविधिर्निस्तरणोपायस्तत्रतन्निमित्तंविधा
यनस्तोतुंशक्तःयथासतितैलादिसाधनेग्निसंपर्कमात्रेणदीपेमुख्यदीपत्वसिद्धिस्तथापूर्वंसाधनयुक्तस्यांतेस्तुत्यादिसाधनमात्रेणापिवि
धियुक्तस्तुतिकर्तृत्वसिद्धिःश्रुतापूर्वेषामतःसाधनवतामेवमुख्यस्तुतिविधिर्नममस्तुतिपूर्वापरसाधनायुक्तस्यमुख्यस्तुतिविधिरित्यर्थः
ननुविधिनास्तुत्याद्यभावेकथमिष्टसिद्धिरितिचेन्न तेपिमामेवकौंतेययजंत्यविधिपूर्वकमितिवाक्यादन्यदेवपूजास्तुत्यादिनापिभगवत्प्रा

जास्तुत्यादिनेष्टसिद्धौ कुतस्तरां नतदभिन्नायास्तवाविधिस्तुत्येष्टसिद्धिरिति भावः ननुस्तुतेरविधित्वेपि मुख्यं चान्यदेवकुरु मुख्यैकमंतरा
मुख्यफलाश्रवणादिति चेत्सत्यं यद्यपि साधनेष्वेकमुख्यसाधनेन मुख्यार्थसिद्धिः गोपीगजप्रभृतिषु भक्तिस्तुति मुख्यैकैकान्यसाधने
नाप्यर्थसिद्धिदर्शनात्तथापि कलावन्यसाधनाशक्तौ कीर्त्तनादेव यथा हरिर्भक्तान्मत्वा तदभीष्टं ददाति तथा तदभिन्नात्वमपि तन्नामयुत गंगा
दिनामस्तुत्यादिनैवेष्टं कुरु किं तदिति चेदेतदित्याह तन्मनोऽनार्य्याविषयो दिव्यमूर्त्तिर्भगवांस्तद्द्वारा यतो वाचो निवर्त्तंते इत्यादिश्रुत्या मनआ
द्यविषयोपि सामान्यत्वेन अविज्ञातं विजानतां विज्ञातमविजानतामिति श्रुतेर्विशेषत्वेन विषयः य एवमविषयविषयो भगवांस्तस्मिन्स्थापय
वास्तवरूपेक्रमेण स्थिरीकुरु किं कृत्वा मन एवमतः प्रच्याव्याध्यासनिवृत्त्या पृथक्कृत्य नन्वदृश्यत्वे तत्प्रयाबुध्यते ति श्रुतेर्मनसस्तल्लक्ष्य प्राप्तिसाध
नस्य कथं पृथक्करणं युक्तमित्यत आह अशुभगुणसमूहस्य भवनमिति अशुभ इतिच्छित्वा अशुभो ह्योधकाये रागादिगुणास्तेषां समूहः समु

तथाप्येतदङ्गेऽशुभगुणसमूहस्य भवनं मनस्त्वं प्रच्याव्याविषयविषये स्थापय घनम् ८

दायस्तस्य भवनमधिष्ठानमतस्तत्प्रच्युतिरुचितैवेत्यर्थः ननु कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरिति श्रुतेः श्रद्धादि भव
नत्वे कथमशुभगुणाधिष्ठानत्वमेवेत्यत आह घनं विषयासक्ततयातिदृढतरं श्रेष्ठप्रतियोगितस्यैव प्रच्युतिरपेक्ष्यते न तु तद्विलक्षणस्य
लक्ष्यस्थितिप्रार्थनाविरोधात्तद्वैविध्यं तु मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च अशुद्धं विषयासक्तं शुद्धं ब्रह्मणि संस्थितमिति वाक्याज्ज्ञेय
दृढतरत्वमपि चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करमित्यनेन ज्ञेयं ननु मनसो द्वैविध्यमात्रत्वे कथ
मनंतं परमाणुरूपमिति तार्किकलक्षणमिति चेदेकस्यैव यथा वृत्तिभेदाद्वैविध्यं तथैव तत्रापि वृत्त्यानंत्यादानंत्यमन्यथा प्रत्यभिज्ञा तन्नन-
स्यादित्यर्थः स कार्य्याज्ञाननिवृत्त्यपेक्षायां मनसोपि सापेक्षित्वे व पुनरपेक्षणे पुनरुक्तिस्तु न तत्कार्येष्वति दृढस्य मनसोपि निवृत्त्या शुद्धस्य प ८
रप्रवेशे चार्थापत्त्याऽज्ञाननिवृत्तिप्रकारांतरनिरूपणेन परिहृतैवाज्ञाननिवृत्तिं प्रथममेवाल्पसाधनेनाज्ञात्वेत्यर्थः ८ छ

एवंहिमनसोर्द्विविधयोरशुद्धस्यमनसोनिवृत्त्याशुद्धस्यब्रह्मणिस्थापनप्रार्थनेनतस्थितौसर्वार्थसिद्धिंविधायापितदनुवादेनेंद्रियाणां हिचरतांयन्मनोनुविधीयतइतिवाक्यादिंद्रियप्रवृत्त्यधीनप्रवृत्तिमतइंद्रियाणिप्रमाथीनिहरंतिप्रसभंमनइतिचेंद्रियकृतहरणविषयमनसस्तन्निवृत्त्यानिवृत्तिमिच्छन्निंद्रियगणस्यापिशुद्धस्यैवमनोवत्तस्मिन्स्थित्यर्थंपूर्वमभुद्धतांनिर्वक्तिमनइत्यर्द्धेनहेशुभेशुभानिसंतियस्याःसर्वेषांशुभइतितवनाम्नैवाशुभंमनइंद्रियाणामप्यशुभतांदूरीकुर्वितिसंबोधनार्थंप्रकटयन्नाह यथामनोदुष्टमशुद्धंतत्रापि तदभीष्टेपथिसुतरामंतरायराहित्येनरतंलग्नमित्थंतथार्थेतथैवेंद्रियगणोपिवातिप्रविशतीत्यन्वयः चकारान्मनःसापेक्षश्रेष्ठेपि पथिक्वचिल्लग्नमवस्थाभेदेनसापेक्षश्रेष्ठेपिलग्नंचेत्तर्हिकिमितिनिंद्यतेतत्राह दुष्टइतिदुष्टपथिलग्नस्यैवनिंदातत्परिणामपूर्वक

मनोदुष्टेदुष्टंपथिसुनिरतंचेंद्रियगणःशुभेदुर्म्मार्गाब्धौप्रतिदिनमुवातीत्यमगुणाः

परप्रवेशार्थमितिभावः इंद्रियप्रवेशाधिष्ठानमाहदुर्म्मार्गाब्धावितिं दुष्यंतेनिंद्यंतेइतिदुष्टाबहिर्मुखास्तैर्नमैकदेशन्यायान्मृग्यतेऽन्विष्यतेऽर्थात्कुमार्गः सएवाब्धिर्दुस्तरसाम्यात्तत्र ननुदुर्मार्गाब्धिप्रवेशेपिक्वचिदिंद्रियगणस्यपरंपराध्यानेसाक्षाद्वाक्वचिदात्मदर्शनगुणकत्वादनिंद्यैवेत्यतआहागुणस्ताहशागुणवानित्यर्थस्तथाचश्रुतिः परांचिखानिव्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यंतिनांतरात्मानमितिप्रह्लादोपि जिह्वैकतोमुमपकर्षतिकर्हितर्षाशिष्णोन्यतस्त्वगुदरंश्रवणंकुतश्चित् घ्राणोन्यतश्चपलदृक्क्वचकर्मशक्तिर्बह्व्यःसपत्न्यइवगेहपतिंलुनंतीतिमायेणबहिर्मुखत्वेपिपरिणातस्यतानिसर्वाणिसंयम्ययुक्तआसीतमत्परः

वशोहियस्येंद्रियाणितस्यप्रज्ञाप्रतिष्ठितेतिभगवदुक्तस्थितप्रज्ञलक्षणान्यथानुपपत्त्याशुद्धस्येंद्रियगणस्यशुद्धेपरेमनोवत्प्रवेशा
र्थमादौतत्पूर्वरूपकथनमित्यर्थः ननुपूर्वमपिकदाचिद्दित्याहत्यकदाचिन्नश्रेष्ठागुणायस्मिन्नित्यशीघ्रत्वार्थेपुनरनिंदासदेत्यतत्रा
ह प्रतिदिनंसुषुप्त्यादावपिसूक्ष्मवासनाक्त्वात्सर्वदेत्यर्थः ननूभयेंद्रियपूर्वरूपवर्णनेनपरिणतोभयेंद्रियस्थितिः परब्रह्माभिन्ने
मय्यर्थितासाचदुःसंगनिवृत्त्यातस्तांकुर्वित्यतआह दुष्टैःसंगस्तेनमनसाप्रकर्षेणानवस्थयालीनोतोहोकथंतन्निवृत्तिःदुःसंगप्र
लीनताहेतूनाह सुदुष्कर्मभिरिति सुतरांदुष्टानिदूषणैर्दूषितानियानिकर्माणिमात्सर्य्यादीनीहपूर्ववाकृतानितैः ननुकर्मणांतुभो
गादेवक्षयात्ततोदुःसंगनिवृत्त्यास्वयमेवाभीष्टंभविष्यतिकिंमत्प्रार्थनयेतिचेदनवस्थाभियादुःसंगनिवृत्तिंसंबोधनेनैवार्थयति-

प्रलीनोदुस्संगेशुभगतिसुदुष्कर्मभिरहोप्रयाचेकृत्वात्वांक्षिमिहनुधृतिज्ञाविभुरहो ९

हेशुभगतिशुभानांसर्वेषांगतिःप्राप्तिर्यस्यास्तत्संबुद्धौहेशुभगतित्वमेवाशुभकर्मनिवृत्त्यादुःसंगमपिनाशयत्वत्कृतकर्मादिना
शेपुनरनुत्पत्त्यानवस्थाद्यभावःस्यादित्यर्थः ननुपूर्वकर्मणांभोगादिनाप्रार्थनयाकृपयाचानवस्थाद्यभावेननाशेप्यग्रेतुधृतिमंत
रानयथेष्टसिद्धिरितिचेत्तत्राह धृतिज्ञाविभुरितिधृतिरित्युपलक्षणंज्ञात्वाचतदवस्थितिरितिज्ञानोत्तरमेवसर्वनयुक्ततानियमाद्धृत्या
दिज्ञानोत्तरंतद्युक्ताधृतिज्ञास्तेभ्यश्चान्यइतिधृतिज्ञाविभुः स्तुत्याद्यनंतरमशक्तःभनकुर्यामितिधैर्य्येणप्रतिज्ञायतंइत्स्तुत्यादिकर्तु
मसमर्थइतिभावः अतःकिंसाधनंनिमित्तंकृत्वाकिमभीष्टमिहस्तुतिप्रकरणेयाचेनकिमपीत्यर्थः त्वंत्वन्यसाधननिरपेक्षैवस्तुति ९
नामस्नानादिमात्रेणफलदत्यतःस्वमहिम्नातथैवकुरुमदभीष्टमितिदिक् ९ ६९ ६९

नन्वन्यसाधननिरपेक्षस्तुतिनामादिसाधनेनैवकर्मसापेक्षत्वादिति सूत्रोक्तवैषम्यनैर्घृण्यादिदोषंपरिहरँस्तुत्ययसाधनासत्त्याच्चाप्यज्ञान मारभ्यदुःसंगांतदोषपरिहारद्वारातेनैवाभीष्टसिद्धिरपेक्षितातथापिसर्वसाधनाशक्तावंतेसर्वकर्मफलत्यागंततः कुरुयतात्मवानितिवाक्येना क्तेनायसर्वशुभकर्मफलार्पणमात्रेणाप्यर्थसिद्धिविधानात्तावन्मात्रंतुशरीरानायाससाध्यत्वादिष्टार्थंकुर्वित्याशंकितस्तस्यापिसंशया- क्रांतत्वेनासिद्धौतत्कर्तृभ्यः श्रेष्ठेभ्यआत्मानंभिदन्केवलस्तुतिनामसाधनेनैवपुनरिष्टंरक्षांचार्थयते महत्पुण्यमित्यनेन हेशुभगुणे साधनासमर्थेष्वपिक्रमसाधनविधानेनशुभाः अनुपमकरुणादयोगुणायस्याअतस्त्वमेवदिव्यगुणवत्यहंतुनकेनापिगुणेनयुक्तस्त्व न्येतुयेत्वयिपरब्रह्मरूपायांमहतांपुण्यानामिहान्यत्रकृतानामोघंसमूहंनिष्कामतयाह्यपुनरर्पितवंतस्तान्नराऩर्पणादिवासेगुणःश

महत्पुण्यौघंयेत्वयिशुभगुणे दुःखगगुणेजनाँस्तान्नुद्धर्तास्यसिगुणयुतान्संगमरणे

भुच्छेदनंतद्गुणाः संसारच्छेदनादयोयस्यवैराग्यस्यतेनयुताअतस्तान्नुद्धर्तास्युद्धरिष्यत्येव ननुअर्पणेनैवोद्धारसिद्धौश्रेष्ठाः पुनःकिम- र्थंवैराग्यमाश्रिताइत्यतआहसंगमरणे दुष्टसंगस्यमरणंनाशः यद्वासंगमेनरणस्तंनिमित्तंकृत्वावैराग्यमाश्रिताः यद्यपिसर्वकर्मफलत्यागंआ हुस्त्यागंविचक्षणाइतीश्वरवाक्यात्कर्मफलार्पणरूपमेववैराग्यंपुनरसिगुणयुताइतिवैराग्येपुनरुक्तिर्दृश्यते तथापिदृष्टानुश्रविकविषयवि तृष्णस्यवशीकारसंज्ञावैराग्यमितियोगसूत्रोक्तापरवैराग्योत्तरंद्रष्टुः स्वरूपावस्थानात्मकंपरमपिवैराग्यंकर्तव्यंतेनविनाशुकादिवत्पूर्वमे वपश्चाद्वाध्रुवादिवत्सकारणसंसारानुच्छेदादतः क्रमेणकथनान्नपुनरुक्तिरित्यर्थः भगवानपिनरूपमस्येहतथोपलभ्यतेनांतोनचा दिर्नचसंप्रतिष्ठा अश्वत्थमेनंसुविरूढमूलमसंगशस्त्रेणदृढेनछित्त्वेत्यनेनपूर्वोक्तापरवैराग्यवत्परमप्याह परस्त्वंचास्यज्ञानादेवा

संगत्वनियमाज्ज्ञानात्मकवैराग्येणा ज्ञानात्मकस्य संसारस्य कल्पितत्वेन निवर्तकत्वाद् परे तु वैराग्ये भगवदर्पणेण फलस्य नित्यत्वेनान्य
स्यानित्यत्वज्ञानमिति भेदः ननु त्वमपि परापर वैराग्यमार्गे स्वी कुर्विति चेदस्तु शरीरानायाससाध्यलोभेन भगवदुक्त परापर वैराग्यात्मक मु-
ख्यसाधनस्वीकारपक्षोहं तु तुलसीरामो द्विजः ह्रस्वत्वं तुलसीन्यत्र छंदोनुरोधेन ननु निश्चयेन मार्गाच्छ्रेष्ठैरन्वेषणीयात्सर्वस्माद्धीनोत एव ताप
नाशकसाधनाभावात्सुतप्तः सुतरां प्राप्तः केवलस्तुतिनामोच्चारणसाधनेन त्वां प्रति तु शरणं शरणार्थं यातो गतः अतो जगति संसारे गतं मां नि
त्यं साधनराहित्येनान्यैस्त्यक्तं खलु रक्षेष्ट सिद्ध्येत्यर्थः रक्षिष्येश्चेन्मरणे मरणस्यानियतत्वान्मरणात्पूर्वमेव रक्षेत्यर्थः ननु सुतप्तस्य स

त्वहं मार्गाद्धीनो ननु तुलसिरामो हिमकणे सुतप्तस्त्वां यातः खलु जगति मां रक्ष मरणे १०

र्वमार्गहीनस्य यत्किंचित्साधनमंतरापि कथमिष्टसिद्धिरित्याशंकितः संबोधनाभ्यां तत्सिद्धिं प्रकटयति हे हिमकणे हिमाः शीतलास्तापना-
शकस्वभावाः कणाः शीकरा यस्या हिमगुण इति पाठे तु तापनाशकस्वाभाविकगुणवतीत्यर्थः हे खगगुणे खगो गरुडः शश्वत्स्वप्रीति
साधनस्वनामोच्चारण प्रार्थनादिरहित टिट्टिभापत्यरक्षणादिगुणवाँस्तद्वदन्यसाधननिरपेक्षतया प्युद्धारस्वभावा गुणाः यस्या य
द्वा खगो वायुस्तद्वत्प्राणादिरूपेण निरपेक्ष रक्षवन्निरपेक्ष रक्षणादिरूपा गुणा यस्यास्तत्संबुद्धौ हे खगगुणे उभयसंबोधनार्थाव १०
लोकनेन साधनमंतराक्रमेण तापनाशं प्राणादिवत्सन्मार्ग प्रेरणमपि त्वमेव कुर्विति भावः १०

ननुतप्तस्य मार्गहीनस्य तव स्तुतिनामभिरेवाज्ञाननिवृत्त्या तत्त्वताद्यधिकरणत्वानाश्रयत्वं मत्तइष्टंचेत्तर्हि कालांतरे स्तुत्याद्यावृत्त्यैव तद्भवि ष्यति शीघ्रताचेदन्यत्र भ्रमणंत्यक्त्वा मत्तटवासादेव शास्त्रेणेष्टसिद्धिविधानात्सवासतदावृत्तिंकुर्वित्यानोदितः जन्मपूर्वकवासादीनां कर्माधीनतांनिरूपयन्वासोपिप्रार्थनाफलदायास्त्वदधीनइत्यभिप्रायेणतच्छुभतटावाप्तिमेवार्थयते स्फगोरीर इत्यनेन अपिस्थूलव्य वहारे हे स्फरतटिनि स्फरसेव्यतटत्वेपिस्वस्तुतिस्नानादिनान्यानपिदेवादिकरणस्वभावे मे मम जन्मतुस्कतरांगवामिंद्रियाणांतदु पलक्षितदेहादीनांचयेऽरयः व्याधिव्याघ्रादयः दूषकाश्चतान्सर्वानपीरयतिकंपयतिदूरे प्रक्षिपतितत्तस्थजनरूपेणतदधिष्ठातृरू पेणवेति स्फगोरीरो ग्रामस्तत्राभूत्कर्मभिरितिशेषः तदनु पश्चादत्र पृथिव्यामेवचिरंचिरंकालंवासस्तु बिभ्यतिजनायस्यादुष्टाए वान्यजीवाश्चपूर्ववदधिष्ठात्रादिभिरेवेति भीमाभिवाणीनामिकासाचासोपुरीलक्षणयुतत्वात्पुरीतस्यांसत्रशुभतः शुभकर्मभि

स्फगोरीरेजन्माप्यभवदनुवासोत्रशुभतश्चिरंभीमापुर्य्यांतदनुस्फरववासो स्फसुरवतः

रेवजन्यग्रामापेक्षयातत्रममाध्ययनादिशुभकर्मप्रवृत्तेः तदनुत्वसवइंद्रियाणिचतेषांजलादिभिः स्फरवहेतोः चिरमवतिरक्षति स्वस्थान्सर्वानपिजलादिभिरेवाधिष्ठातृरूपेणैवेति चिरावोग्रामस्तत्राभूत्कर्मभिरेवान्यत्रवासेपिमात्रादीनांमुख्यावासत्वादज्ञाना त्तत्रदृष्टेश्चत्रयाणामेवमुख्यत्वेनकथनं त्रिषुदुःखस्यापिसत्वेव्युत्पत्त्यर्थासिद्धिस्तुराजादिवत्स्वकर्मणैवदत्तत्वापरिहृतेवसुखस्या पिकर्मणैवसत्वेपुनरसिद्धिरितिचेन्मीमांसकमतानादरणेनकर्मप्रवर्तकेश्वरराजाधिष्ठात्रादीनांस्फरवप्रदत्ववर्णनेनैवतदंतश्चैतन् न्यप्रसन्नताद्वाराफललाभविधानान्नाथासिद्धिरपीतिभावः तेतुनिकटेनितरांकटतिवर्षतिस्वाभीष्टस्फरवमाच्छादयतिचत्वन्नि कटोपलक्षितत्वज्जलस्नानमात्रेणैवगंगास्नानंशिवोदेवोविप्रसूयात्मचिंतनम् ध्यानंनारायणस्यैतत्सकलंधर्मलक्षणमिति

हेमाद्रौ विष्णुधर्मोत्तरवाक्यादन्यधर्मात्मक साधनाकरणनिमित्तके ष्टसिद्धिसंशयरूपदुःखंकटे स्मृते वर्षावरणार्थावादायेत्यर्थ
वतित्वत्समीपेवासोनाभूत्प्रमादतोममेतिशेषः हिरत्रप्रमादमुद्बोधयनूशुभतटप्राप्तेरावश्यकत्वमुद्बोधयति प्रमादतश्चव्यवहारे प्रार
ब्धसुखेपुरुषार्थसुखत्वज्ञानेन प्रवृत्तिः परमार्थेत्वद्वारादि सेवादौप्रारब्धसुखत्वज्ञानेन प्रवृत्तिः प्रथमेकालवैषम्य दर्शनात् हि
तीयेशास्त्रसाधनवैयर्थ्यापत्तेश्च प्रमादत्वमप्रमादश्चोभयत्र पूर्ववैपरीत्येन प्रवृत्तिरित्यर्थः तथापिमत्प्रमादमगणय्यापद्यापन्न
त्वांप्रतिशरणागतंमांतेशुभतटेसर्वाशुभनाशनस्वभावेनयनयप्रापयप्रापयस्वतिशीघ्रार्थावीप्सातेनिकटेतेशुभतटइत्यन्वय
भेदात्तेशब्द पुनरावृत्तिः यद्वाहिमांतइतिशुभतटविशेषणमित्यर्थः यद्वाथैः सूक्ष्मार्थेयमर्थःसुतरांगवामिंद्रियाणामरिरिवारिः
सुषुप्तिपदार्थस्तत्रेंद्रियाणांस्वकार्य्याशक्तेः तत्रममेंद्रियाध्यासाडुत्पत्तिक्रमेणजेन्मइवजन्मततश्चभीष्मोहिदेवइतिवाक्यान्मन

चिरावेमेभूत्तेस्मरतटिनिवासोननिकटे तथाप्यद्यापन्नं नयनयहिमांतेशुभतटे ११

सोभीमापुर्य्युपलक्षितस्याजितस्यसर्वभयकर्तुः स्वप्नावस्थाभिन्नस्याध्यासात्तत्रवासश्चिरंस्मृषुप्त्यपेक्षयातत्रचिरस्थितेः ततश्चत
त्सावर्ण्यसावर्ण्यसंबंधेनडलयोरिव डरयोरप्येकत्वेचिरमिंद्रियैर्व्यवहारवर्ज्जायद्वद्वस्थाभिन्नार्थचिरावाध्यासात्तत्रवासः चिरं
पदाध्याहाराच्चिरंज्ञेयउभयावस्थापेक्षयापितत्रचिरंस्मरवस्थितः तेतुनिकटपदोपलक्षिततुरीयरूपेनितरांकटतिवर्षतिश्च वस्था-
भिमानिनांविश्वतैजसप्राज्ञानांचिच्छत्त्यात तत्स्थितिस्मरवंस्वरूपप्राप्तावनर्थनिवृत्त्यानंदसुखंचेत्यर्थलक्ष्येपरोक्षज्ञानेनापि वि
चारात्मकवासोनाभूत्तथाप्यद्यापन्नंतद्रूपेत्वयिवाचैवलभ्रमपिपरोक्षापरोक्षज्ञानक्रमेणनयनयेति प्रार्थनातुरीयप्राप्तिमंतरा- ११
निःशेषसकार्याज्ञानानिवृत्तेरित्यर्थः शेषंसमानम् ११

छ छ छ छ

ननुशरीरात्याध्यासात्स्थूलदृष्ट्याचेच्छसिपुनःपुनर्यामति दुर्लभांसकार्याज्ञाननिवृत्तिमन्यसाधनमंतरास्तुतिफलासमतदवासादिद्वारास्तु-
तिमात्रसाधनेनैव तथापिसाभोगायुक्तशरीरेणतद्विद्धिप्रणिपातेनपरिप्रश्नेनसेवया उपदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्त्वदर्शिन इति भग
वद्वाक्यात्पूर्वं हरिहरगुरुसेवयापृथक्त्वेषामेकरूपत्वेनसेवयाहरिहररूपगुरुसेवयावाशुद्धेमनसि पश्चात्परब्रह्माभिन्नमत्कृतिमा
त्रेणापि भवत्वन्यथानोक्तमेणैवार्थसिद्धिविधान्पूर्वापरक्रमादेवेहसाधनादर्शनेपि केषांचित्काशीमरणादिना कल्याणदर्शनादतः
कुरुशरीरयोग्यमितिचेच्छरीरंकर्माधीनंतानित्वन्नियम्यान्यतस्त्वमेव पूर्वापरसाधनज्ञानवती मत्प्रार्थनामात्रेणाघारभ्यदुस्सं
गनिवृत्तिद्वारायथोचितंकुर्वित्याह शरीरमित्यनेन हे भगवतिसमग्रैश्वर्य्यवीर्य्ययशः श्रीज्ञानवैराज्ञात्मक षड्भगपदवाच्यत्वतत्ला

शरीरंरोगाद्यैरशुभशुभजातैर्नहियुतंयुतंभोगासक्तंप्रथितशुभजालैरविरतम्

दन्यानपिश्रीमान्स्वभक्तानिवभगवत्करणस्वभावेमच्छरीरंतुरोगास्तदभावेक्वचिद्रोगाः सुखानिश्चशुभाशुभकर्मभिः क्रमेणजा-
तास्तैर्युतमतः कथंहरिहरादिसेवातेन ननुरोगादिनासेवाद्यशक्तावपिसति रोगेमनसा सूक्ष्मशरीरेण स्वस्थेचस्थूलशरीरेण भो
गानासक्तिमात्रेणैवतदाराधनंकुर्विति चेत्ततोपिप्रबलकर्मभिर्भोगेषूभयशरीरजेष्वासर्वतः सक्तंलग्नं ननुधर्माविरुद्धो भूतेषुकामो-
स्मि भरतर्षभेतिश्रीहरिवाक्यात्कामतदुपलक्षितान्यधर्माविरुद्धभोगासक्त्यनंतरस्तुतिनामादिभिरेवेष्टंसाधयेत्यतश्चाह प्रथितानि
प्रख्यातानियानिशुभजालानिधर्माविरुद्धकामादिसमूहद्वाराकलौहरिकीर्तनादीनितैश्चनहियुतमित्यन्वयः शरीरस्यैकेनापि मु

रव्यसाधनेनायुक्तत्वेकुतो बहुभिर्नेहियुतमिति भावोतरावाविरतं सदेत्युक्तं ननुयमनियमहर्य्यादिसेवादिसाधनाशक्तावपिहठ योगस्यापिविधानाद्धठादेव हरि गुरुहरमूर्तिसांनिध्यमात्रेपिकृतेत्वदिष्टसिद्धिरतस्तदेवतावत्कुर्वितिचेदस्तुसांनिध्यंतैस्तुसर्वदोषो द्भावनेन स्वपादाब्जात्पादकमलात्ततोपितदुपलक्षितस्वपादाक्रांतस्थानादेरपिविशेषेणमुक्तंत्यक्तं दूरेपास्तंशरीरमतः कथमिष्टं सेत्स्यतीत्यर्थः नचहरिस्तुपत्रंपुष्पंफलंतोयंयोमेभक्त्याप्रयच्छतीत्यादिनानायाससाध्यस्वपूजादिनैवांतेबहुफलदानेनक्रमेणसामदानेनोपकर्तागुरुश्चतत्राभक्तेपितस्यकालादिरूपोद्बोधद्वारा भेदोपदेशेनोपकर्ताहरश्चतत्कर्मणैवराजादिरूपेणतत्पदार्थाद्यपहरणे

विमुक्तं पादाब्जाद्धरिगुरुहराणां त्वयि गतं विलोक्यान्तर्म्मातद्भगवति विदध्याः समुचितम् १२

नदंडदातृत्वेनोपकर्तान्चेत्येवमुपकर्तृभिरपितत्प्रीतिसेवाद्यकरणेनत्यक्ते मयापितद्रूपयात्यक्तमेवमत्प्रीतिहेतुकमुरव्यसाधनाभावेनेतिवक्तव्यं त्वयितुगतमितिहेतुगर्भितंविशेषणंत्वयित्वदुत्कृष्टमवलोक्यगतत्वाच्छरणंप्राप्तत्वादतस्तच्छरीरं तत्तस्मिन्नेकीभूतमध्यासान्मांचविलोक्यविशेषेणतत्पृथक्करणरूपेणज्ञात्वासमुचितं मद्दोषानवलोकनेनान्यसर्वत्यागेपित्वद्योग्यंयतितरक्षणरूपमेवविदध्याःविशेषेणकुर्वित्यर्थः अयंभावः शरीराध्यासाद्वस्तुतोनिर्दोषेपिजीवेतत्सत्ताप्रदत्वेन भृत्यदोषमद्राजेवदोषयुतेदोषानध्यासमूलान्कर्तृत्वभोक्तृत्वादीन् स्वस्तुत्यंतर्गतनामादिसाधनाभासमप्युद्योत्कृष्टसाधनंकृत्वापहृत्यान्यैस्त्य १२
क्तमपिसकार्याज्ञाननिवृत्तिद्वारारक्षेतित्वदुचितमवेहि १२

ननु सत्यं युक्त्यातव प्रार्थनं तथापि सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् बद्धः परिकरस्तेन मोक्षाय गमनं प्रति यथागदं वीर्य्यतम मुपस-
क्तं यदृच्छया अज्ञानतोप्यात्मगुणं कुर्य्यान्मंत्रोप्युदाहृतः हरिरित्यवशेनाह पुमान्नार्हति यातनामित्यादि भीष्मादि वाक्याद्धरिरेवा
नेक दोषयुताजामिलादिवदन्यानपि स्वसहित गुरुहरादित्यक्तानपि स्वनामोच्चारण मात्रेणैवात्म सात्कलौ करोत्यज्ञानादि निवृत्ति
द्वारानान्यः नचत्वमपि हर्य्यभिन्नैवेति वक्तव्यं शास्त्रेणेश्वरान्मम भेदेपि त्वयैव स्वकपोलकल्पनया भेदाभाव प्रतिपादनादतः हरिह
रादित्यक्तस्य तव हरिभिन्नायामृत्तः कथमिष्ट सिद्धिरिति दोषं परिहरन् शास्त्रवाक्यादेव युक्तिप्रमाणयुताद्धर्य्यभिन्नतां प्रतिपादयं
न्निष्टं प्रार्थयते भवत्या इत्यनेन हेजननि भगवतीश्वरे भवत्यातवत्वमेव मूलप्रकृतिस्त्वं हिनारायणः परः गंगेत्वं परमात्माच शिवस्तुभ्यं

भवत्याभेदोनो भगवति मतः शास्त्रवचनै र्निराकारासृष्टेरितिच भगवत्पाद कथनैः

नमः शिवे इत्यादिभिः स्कांदादिपुराणेषु ब्रह्मादिवचनैरेवापि भेदोनोमतः ज्ञातोतः हरिरिव कुर्विष्टमित्यर्थः नचवचनान्यर्थवादरू
पाणि पुरोहितोयं राजेतिवदिति वक्तव्यं विध्यर्थवादादिज्ञ सर्वज्ञ भगवत्पादशंकराचार्य्याणामपि निराकारासृष्टेरभवदियमीशात्मनि
पुराजगत्सृष्ट्यादेवासुरनरप्रमुखं भ्रांतिनिबिडम् निमग्नं दुःखाब्धौ दुरितरचितेर्वीक्ष्यकृपया समुद्धर्तुं नीराकृतिमिह विधायाविर भवदित्या
द्यकथनैः कथनादप्यभेद एव बहुवचनं चैकस्मिन्नपि तद्वाक्ये सर्वशास्त्रसमन्वयोक्तेः चकारस्तद्वाक्यस्यानुभवसाहित्य द्योतक
इत्यर्थः एवं प्रसाध्यैक्यमीश्वरेण गंगायाः स्वरुच्यावशिष्टायां तन्मेवेश्वराभिन्नायां स्वप्रयत्नाद्यभावे प्यकस्माद्यत्किंचिदुत्पन्नभु-
भकर्मार्पणेनापीष्टमर्थयते नैन यतस्त्वं सर्वथेश्वराभिन्नाततोहं त्वय्येवाघरहितगुणान् यत्करोषि यदश्नासि यज्जुहोसि ददासि

यत् यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति भगवदुक्तकर्मरूपानस्मादेववाक्याद‍र्घ्यैर्नमनैः नमस्कारसाधनैः सहार्प्यैविलंत्य
र्थः सर्वैर्ब्रह्मादिभिरर्च्यां पूज्यां यातः शरणमिति शेषः अतः सर्वपूज्यत्वादन्यत्रपूज्ये गच्छेत्यकथयंती जननाज्जन्मनस्तदुपलक्षितषड्
भ्याद्देवभ्यापित्राहितद्वारेणैनपालयेत्यर्थः नचस्तुतिकथनमात्रेणैष्टातथैवपालयामीति वाच्यं मननैः कृत्वा साधननिरपेक्षातिप
तितरक्षणात्मकस्वचरितमननान्यालोच्य रक्षेत्यर्थः जननीत्यनेनतुस्तुतिकथनमात्रेशब्दापशब्दाद्यज्ञानेपिममामातृवत्त्वमे-
वयथार्थकल्पनेनेष्टं कुरु किमन्यत्कथनेनेति भावः ननु गंगायाईश्वरेणाभेदः शास्त्रेण विहितः स परमार्थे व्यवहारे वा आद्या
द्येइष्टापत्तिः द्वितीये मूर्त्तिभेदात्कथमीश्वरवदिष्टकर्तृत्वमितिचेन्न परमार्थेतु सर्वस्यापि मायया भिन्नचिदचित्पदार्थस्याभेद-

ततोऽहं त्वय्येवाघरहितगुणानर्घ्यैर्नमनैर्गतस्त्वां सर्वार्च्यां जननिजननाच्चाहिमननैः १३

ईश्वरेण गंगायास्तुसर्वथैवाभेदादभेद एवेश्वरेणेति भावः नचावतारमूर्तिषु गंगाया अगणनात्कथमभेदः सर्वदेति वक्तव्यम
वताराणामानंत्यात्तत्र गंगाया अपि गणितत्वोपपत्तेः तथाचोक्तं अवताराह्यसंख्येया हरेः सत्वनिधेर्द्विजाः यथाविदासिनः
कुल्याः सरसः स्युः सहस्रश इति नचेश्वरावताराणामेवानंत्यमिति वक्तव्यं पाद्मादिवाक्योक्तेश्वरस्यैवजलाकृतिविधानविरोधा
न्नचेश्वररामकृष्णादिनामस्कगंगानामागणनात्कथं भिन्ननाम्नोरभेदः संनियोगशिष्टपरिभाषया विशेषणाभावस्वीका
रेचपरमार्थेपि भेदाभावाभावादिति वक्तव्यं क्वचिद्रामकृष्णादिनामस्कगणनाभावेपि सर्वत्रगणनाभावेनामानंत्यानुपपत्तेः अ १३
द्यारभ्यापितवनाम्नां गणनयांते धरां दूरीकरिष्ये इति प्रतिज्ञायशेषेण द्विजिह्वाधिकरणसहस्रमुखैर्नामगणनेनापितन्नामा

तापतेश्च नचतन्मुख्यगणनेनांतराया भूत्को पश्यन्नेत्यपिवक्तव्यं सत्यं तेतेन धरादूरीकरणे प्रलयकालाभावेपि प्रलयाप त्तेः नांतं गुणानामगुणस्य जग्मुर्योगेश्वरा येभवपादमुख्या विष्णोर्नुवीर्य्य गणनांकतमो हेती हेति प्रमाणविरोधाच्च नचेश्वरावता रत्वेपि श्रीरामकृष्णादिवत्सेतुबंध गोवर्द्धनोद्धरणादिवत्कार्य्याकरणे पुनरनीश्वराशंकेतिवाच्यमवतारेषु केषांचिन्नृसिंहादीना मेकैककार्यार्थोत्पत्तिवदस्याश्चापि सर्वथापतितोद्धरणमुख्यकार्य्यार्थोत्पत्तिमतित्वात् यद्वास्या अप्यंड भेदनासंग समुद्र प्रवेशपुनः स्वरूपप्रवेशागमनादिकार्य्याणामन्यावतारापेक्षयापि विलक्षणानां विद्यमानत्वान्नच कचित्परमेश्वर पादत स्तदुत्पत्तिविधानादनीश्वरत्वमिति वाच्यं तत्पादनिमित्तकांड प्रवेशात्मकतदुत्पत्तौ तत्पादस्य निमित्तत्वादन्यथा श्रीरामकृ ष्णादीनां स्वपादोपादानकजले स्नानादि क्रियानस्यात् नचयुक्तियुतवाक्यैः साधितेप्येकत्वे हरिगुरु हरांतर्गत हरिणा विमुक्तं त्वयि तु गतमेवशरीरमतस्तस्माद्धि युज्योचितं कर्तव्यमित्यर्थ कथनेनत्वयैव पूर्वं हरिगंगयोर्भेदे कृते कथं व्यवहा रपरमार्थयोरुभयोरभेद इत्यपिवक्तव्यं यथान्येषां श्रीरामकृष्णनृसिंह वराहवामनाद्यवताराणां सर्वथैक्येतत्तद्भक्ता- नां यथान्यावतारा मुख्यचिंतनादि सत्वेपि स्वेष्टावतार मुख्यचिंतनादिभिरेव स्वेष्टादिष्टसिद्धीष्टायां भेद इव भेदे चादो षवदत्रापि दोषोक्तेरभावादिति भावः नच यजमानः प्रस्तरः पुरोहितोयं राजा काशी समा पुरीत्यादिषूपमानोपमेय- योरुपमानस्य मुख्यत्ववदत्राप्युपमानभूत हरेरेवोपमेयगंगाया मुख्यत्वेन भेद एवेत्यपि वक्तव्यं केनाप्यंशेन न्यूनत्वे चोपमेयस्तुतावुपमानस्य मुख्यत्वं भवत्वत्र तु रामेण सदृशः कृष्णः कृष्णो रामः स एव चेतिवद्धरिगंगयोरपि सर्वप्र-

कारेण साम्यान्नच प्राप्तौसत्यांनिषेधस्वीकारे भेद इतिवाच्यं शशशृंगादिवद प्राप्तस्यापिनिषेधितत्वान्नच हरिरेवनी
राकृतिं विधायाविरभवदित्युक्तेपि पुनर्भवत्या भेदोनो इत्यनेन पुनरुक्तिस्तुत्यादित्यपि वक्तव्य मभेद दृष्टेः सर्वत्राति
सूक्ष्मायास्तत्वमसिश्वेतकेतो इतिनवकृत्वोभ्यासवदत्रापि पुनरुक्तेः स्थूणाखननन्यायेन यद्वा सूर्य्यः प्रकाशते शैला
स्तिष्ठंतीति वदनुवादोह्योधनद्वाराद्यभेदनिश्चायकत्वात् नन्वेतावताद्यभेद वर्णनेनापिगुणैरेवा भेदोगंगायाईश्वरेण
नतु मूर्त्या पृथगेव बहुकालं तदन्यावतार विलक्षण पंचभूतांतर्गतजलमूर्तिदर्शनादतः परमार्थदृष्ट्यैवा भेदोस्तु गुणा-
भेदेपि यत्किंचिदधिकरण भेदाद्भेद एवेति चेत्सत्यमाकाशाधिकरणानां घटमठशरीरादीनां भेदेपि विभुर्नित्याकाश
स्य सर्वाधिकरणत्वेप्युपाधिनाधेयतया प्रतिपादितस्या भेद एवान्यथा विभुत्वादिव्याघातात्तथैवाधिकरण रामकृष्ण
गंगादिव्यक्तीनां व्यवहारे दर्शनमात्रेण भेदेपि तद्दिव्य नित्यस्व भक्त पतितोद्धर्त्रादि गुणानां वस्तुतः स्वाधिकर-
णाभिन्नत्वेन सर्वाधाराणामुपाधिवशादेवाधेयतया प्रतीतानां व्यवहारसत्वेपि दिव्य गुणत्वावच्छिन्नत्वेना भेद ए
वान्यथा त्रापि द्वित्वादिकं तु सर्वत्रानित्यमेवेत्युक्तिमादाय दिव्यगुणानामपि भेदाद्द्वित्वेनानित्यतास्यादिति गृहाण
परमेश्वरावताराणां जलादिव्यक्ति भेदस्त्वेवं शास्त्रेण प्रतिपाद्यते तथाहि व्यवहृतये विकल्प इषितोंध परंपरया वाचा
रंभणं विकारोनामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रुतिभिस्तथानसूरयोहि व्यवहारमेतं तत्वावमर्षेण सहामनंती
तिजडाकार भरतोक्तेश्च व्यावहारिक प्रातीतिक पारमार्थिक भेदेनत्रीणि सत्वानिश्रुतितदनुकूलान्यवाक्यज्ञैरुच्यंते-

क्रमेण शरीरादे रज्जुसर्पादेरात्मनश्चाधिष्ठानावधिरूपस्य तत्राज्ञस्य मुमुक्षोः पूर्वं शास्त्रादिसार्थक्यार्थं व्यवहारस
त्वद्वारांते प्रातीतिकसत्वज्ञानेन पारमार्थिकात्मप्राप्तिक्रमः कथितः सिद्धारूढस्य चांतरंगप्रातीतिकसत्वेन पारमार्थि
कात्मप्राप्तिक्रमः मुक्तस्य तु पूर्वं बहिरंगांतरंगसत्वयुक्तस्य प्रारब्धभोगोत्तरमुपाध्यभावे ब्रह्मविद्ब्रह्मैव भवतीत्यादिश्रुतेः
स्वरूपेण प्राप्तस्याप्यस्मृतकंठमणिवत्पूर्वं विस्मृतस्यात्मनस्तदभिन्नस्मरणद्वारा तत्प्राप्तिक्रमः एवं क्रमार्थावलोकनेन ह
रिगंगयोरपि व्यवहारे दिव्यापंचीकृतपंचभूतांतर्गतपृथग्जलादिव्यक्तिसमष्टिव्यक्तिभिर्भेददर्शनेपि प्रातीतिकसत्व
द्वारा व्यवहारे परमार्थे चाभेदो निर्विवाद एव भूतानां दिव्यत्वं चापंचीकृतरूपेणेश्वरसंबंधवत्त्वं पंचीकृतरूपेण जीव
संबंधवत्त्वमदिव्यत्वमिति भेदः श्रूयते चोभयोरैक्यवदन्येषामपि तदंशानां तत्तद्व्यक्त्यधिष्ठानानामुपाधिप्रातीतिक
करन्यामप्यैक्यमत एव प्रातीतिकसत्वेंचोपाधिकृतफलस्य स्वफलत्वेपि व्यवहारसत्वेन्यकृतफलेन फलवत्त्वं पूर्वोक्तमपि
सिद्धं ज्ञेयं नन्वस्तु हरिगंगयोरुभयथाप्यैक्यं जीवानां तदंशानां तु पूर्वोक्तयुक्त्यैक्येपि बहुभिरन्यवाक्यैर्भेदस्य कथनात्
कथमैक्यमिति चेत्क्रमसमुच्चयेन सर्ववाक्यसमन्वयद्वारा सर्वस्यापि जीवादिपदार्थस्यैक्यं मुख्यवाक्यादिभिरत्रा भेदप्र
करणेपि विस्तरभियाऋते ज्ञानादिति श्लोके वेदाभेदनिर्णये भविष्यतीति न चैवं केषांचिन्निर्णयो नो मत इति वक्तव्यं
तन्निर्णयास्वीकारे तेषामेवाव्यक्तं व्यक्तिमापन्नमित्युक्ता बुद्धितादिस्यादिति दिक् १२

ननु हरिणा ममाभेदज्ञाने तवान्येषां च जीवानां भातीति क्रमत्वेनाभेदज्ञाने स्वत एव भेदाभेदज्ञानयोर्विरोधाद्भेदहेतुकाज्ञाननिवृ-
त्तौ किं मत्प्रार्थनया मत्तः सकार्याज्ञाननिवृत्तीच्छयेति चेत्सत्यमपरोक्षज्ञानेपि यावद्देहावधि यमेवैष वृणुते तेन लभ्य इति श्रुत्यांतर्या
मिप्रार्थनाविधाने कुतस्तरां परोक्षवतो न तद्विधिः ममतूभेन गुरुमुखात्परोक्षलेशश्रवणोत्तरकथनमात्रमंतरा तस्त्वमेव हरि
गुर्वादिरूपा स्वस्कृत्यादिनाज्ञाननिवृत्त्येष्टं साधय न च ज्ञानाज्ञानसमुच्चयपक्षे ऐवेष्टंत्वमेव कुर्विति वाच्यमुभयविरोधश्रव-
णादित्याह विजानंत इत्यनेन हे गंगे विशेषेण जानंतोपि सामान्यतोऽभेदबुद्ध्या न जानंत्यात्मानमतरा वज्ञानाज्ञानसमुच्च
य इत्यभिप्रायेण कथनं तु केषांचिन्मे मया हृदा मनसा हि निश्चयेन न गतं ज्ञातमुभयोस्तेजस्तिमिरवद्विरोधश्रवणात् न च-
जानंतोपि न जानंतीति किं बहूक्त्या न मे प्रभो मनसो वपुषो वाचो वैभवं तव गोचरः पश्यंतोपि न पश्यंति पश्यंतं परमेश्वरमिति ब्र

विजानंतो जानंत्विति न कथनं मे न हि हृदा गतं ज्ञाने ज्ञानं प्रभवति कथं भावयविदा

ह्मनारदवाक्याज्ज्ञानाज्ञानयोरेकत्रसमावेशपक्षोस्त्येवेति वाच्यं तद्वाक्यस्यापरोक्षज्ञानेनात्मतया जानंतो ज्ञानिनः कश्चित्प
रोक्षसमये ह्यात्मनो दुर्ज्ञेयत्वात्तं न जानंतीति क्रमसमुच्चयप्रतिपादकत्वात् न च कथं तर्हि चितिज्ञानाज्ञानयोर्विरोधिनोः स्थितिः स-
र्वाधिष्ठानत्वात्तस्येति वाच्यं सामान्यचितोज्ञानाधिष्ठानत्वेपि विशेष एव तद्विरोधदर्शनान्न चाभेदमते तदैक्ये विशेषचितावप्युभयोः
सहस्थितिसमुच्चयोस्त्विति वाच्यं परमार्थाभेददृष्ट्यात्मकज्ञानसमये मुक्तौ चाज्ञानस्य वास्तवत्वाभावे ह्याभासकथनमात्रक्रमेण
तत्स्थितेरदोषत्वादर्थात्क्रमेणैव ज्ञानीश्वरपररूपाप्तिरूपमुक्त्योर्जीवन्मुक्तिनिर्गुणकथनव्याघातयोर्विधाननिषेधाच्च अत
एव स्वाश्रयस्वविषयप्रतिपादनेन सामान्यचितौ सहसमुच्चयोक्तनान्यत्रेति भावः नहि मन्मुखादेवैतदन्येभ्यः श्रुत्वा कथ्यते समुच्च

यद्दूषणंत्वं सर्वज्ञापि मत्प्रार्थनया ममसमुच्चयदूरीकरणार्थमद्यैवज्ञानेसत्यज्ञानं कथं भवतितत्रापि प्रभवतीति विदास्वज्ञानेन भावय विचारयेत्यर्थः येषांतु परोक्षापरोक्षक्रमेण ज्ञानाज्ञानसमुच्चयकथनं तद्युक्तं येतु श्रवणमात्रज्ञानेनानुभवादिशून्या अन्यान् सर्वानपिक्रमेण भक्त्यादिषु यथोचितं स्थितान्निंदमानाः ज्ञानाज्ञानसहसमुच्चयवादद्वाराज्ञानबद्धा इत्युच्यंते तत्कथनमयुक्तं संसारानिवृत्त्योदरंभरणाद्यर्थत्वात्तत्कथनस्य तथाचाचार्य्याः कुशलाः ब्रह्मवार्त्तायां वृत्तिहीनाः सुरागिणः तेप्यज्ञानतमानूनं पुनरायांति यांतिचेत्यन्यत्रापि सर्वंब्रह्म वदिष्यंति संप्राप्तेचकलौयुगे नानुतिष्ठंति मैत्रेय शिश्नोदरपरायणाः इतिसर्वे मूर्खा एवात्र सर्वशब्देन ग्राह्याः अन्यथा भक्तिज्ञानसंप्रदायोच्छेदापत्तिः स्यादतो ममज्ञानिज्ञानबद्धैव लक्षणं गुरुमुखश्र

स्फुदूरं कुर्य्यास्त्वं भुवनजनमोहोद्भववनं तदेवाद्याज्ञानन्त्वयि भुवियथामेसुगमनं १४

वणमात्रेणोभयपक्षस्यकथनमात्रंच ज्ञात्वामत्कृतप्रार्थनामात्रेण यत्प्रसिद्धमज्ञानं सर्वनाशकमपिसकार्यं मिन्नवदवभासमानं तदेवस्फुदूरं कुर्य्याः स्फुतरां निःशेषतयानाशयेत्यर्थः कथंभूतं भुवनजनमोहोद्भववनं भुवनेषुयेजनास्तेषांमोहसिंहस्योद्भवायोत्पत्तयेवनमिववनं सतिवनेसिंहग्रहणादिकं दुर्लभं तथैवाज्ञानवने मोहतदुपलक्षितान्यजयस्यापिदौर्लभ्यमेवेति भावः कथमनेकजन्मादिकारणाज्ञानस्यात्मस्फुतिमात्रेणैवाद्यैवनाश इतिचेत्तत्राह त्वयिभुविसत्तारूपायामद्यारभ्यानर्थनिवृत्तिद्वारा बहुकालेनापि स्फुगमनं स्फुतरांगमनं यथा तथैवकुर्वित्यर्थः असुगमनमिति छेदेतु गरीयस्याकृपयात्वयि प्राणगमनं यथाद्यैव तथापि त्वयाकर्तुंस्फलभमेव तथाचसत्तामात्रेणलयोह्यधिकाश्रुतिः नतस्यप्राणाह्युत्क्रामंत्यत्रैवसमवलीयंत इति हत्वा समुच्चयाज्ञानस्फुतिमात्रेणजाह्नवि कार्यकार्यत्वयेष्टंमेनमस्फुभ्यंदयावति १४ ५ ५

ननु मत्प्रार्थनामात्रेणेष्टसिद्धिवदन्यानपि वस्तुनईश्वराभिन्नान्देवानृषींश्च सर्वदेवश्रेष्ठान्प्रार्थयस्व ततोपीष्टं सेत्स्यत्येवेति चेत्तत्रा
ह गताइत्यनेन हे श्रेष्ठे देवास्तु सर्वर्षिगणयुता दूरे गताः गमने बीजमाह कलिं वीक्ष्येति द्वितीयं मुख्यं हेतुं गमने चाह हरेरंतर्द्धाने सतीति
ननु कलिसर्वदोषनाशक हरेरंतर्द्धाने स्वतत्रापि कलिदोषनाशकत्वात्तद्गमनमनुचितं कलिदर्शनमात्रेणेति चेत्तत्राह मलिनं कलि-
मिति मलिनदर्शनानर्थ्यनिष्टविधानादुचितं गमनमित्यर्थः ननु किंनु बालेषु शूरेण कलिना धीरभीरुणेति वाच्यात्तत्रा शूर -
कलिदर्शनेन गमनं पुनरप्ययुक्तमेवेति चेत्तत्राह जनोन्नाशबलिनमिति जनानामुदधिकं यथास्यात्तथा नाशः स्वधर्मभ्रंश
रूपस्तत्करणे बलिनं दृष्ट्वेत्यर्थः नचान्यनाशकेपि कलौ तेषां दुःखादिप्रदत्वाभावात्केषांचित्कृपया च पुनरपि गमनमयुक्त
मेवेति वाच्यं ऋते परानुग्रहमात्मशीलमित्युक्तेः कलौ जीवदुःखादृष्टप्राबल्यात्सति दुःखे स्वसमये कलेरपि कालप्राबल्याद्

गतादेवा दूरे ऋषिगणयुता वीक्ष्य मलिनं हरेरंतर्द्धाने कलिमथ जनोन्नाशबलिनम्

पसरणाभावे च परानुग्रहात्मकस्वशीलखंडनभिया सर्वजीवदुःखदर्शनेनापि तद्गमनस्यौचित्यादिति भावः यद्यपि हर्य्यादिव
त्तथाप्यद्यारभ्य चत्वारिंशद्वर्षांतं न भावस्तथापीदानीं तु स्तुशिष्टातैः स्तुतरां सर्वाभावेपि दययास्वस्नानादिनैव कलौ जीवोद्धारार्थम
वशिष्टां वस्तुतस्त्वन्यदेवादीनामपि हर्य्यभिन्नत्वेस्वां तु सर्वप्रकारेण हरिरूपामद्य शरणं प्राप्ताः प्रकर्षेण स्तुतिमात्रेणैवाज्ञान
निवृत्त्यर्थं शरणं गत इत्यर्थः कथंभूतां शिष्टांतःकरणकरणोन्मूलनतटां शिष्टानां स्वधर्मनिष्ठानां यान्यंतःकरणानि तेषां
करणमुपादानमज्ञानं तदुन्मूलनेन तन्निःशेषसाधने तटे यस्याः स्वमृदेतितां तथा च ब्रह्मपुराणे गंगातीरसमुद्भूतां मृदं मूर्द्ध्नाबिभ
र्तियः बिभर्ति रूपं सोर्कस्य तमोनाशाय केवलमिति ननु शिष्टाज्ञानस्यैव मत्तटादीनि नाशकानीतीदानीं त्वयोयथावदुक्तम

नः स्फूर्तिमात्रेणैवेष्टसिद्धीच्छाचेत्तर्हित्वमपिशिष्टोभवेतिचेदहंतुनशिष्टः कथंतर्हि प्रार्थनयाह्यशिष्टेष्टसिद्धिरितिचेद्भावीशिष्ट तापिस्यादत एव पूर्वमशिष्टात्म्यपिशिष्टाः केचिदभूवंस्तथैव भवत्यादिकृपया भविष्यंतीत्यभिप्रायवान् गंगांविशिनष्टि कलिगुण रणेमारणभटामिति कलेर्गुणाः शुष्कविग्रहादयस्तैरणेऽर्थात्तेषामेव तत्रमारणंतत्र भटांचातुर्य्येणसाधननिरपेक्षस्नाना दिनैवकलिगुणप्रोत्साहंविधायतन्मारणशूरामित्यर्थः अतएवान्येभटायथास्वसंपर्कादिनैव कातराः नपियथाशूरान्कुर्वंतितन- थात्वमपिकलिगुणाशिष्टान् शिष्टान्करोत्येवतथाश्रवणादितिभावः ननुकलिगुणानांजडत्वात्तैःसहकथंयुद्धंतदभावेकथंविशे षणसार्थक्यद्वाराशिष्टस्यशिष्टकरणमितिचेत्तदभिमानिचेतन्याभिप्रायेण युद्धमन्यथोपनिषदिप्राणादिजडसंवादोनस्यादि

स्फशिष्टांशिष्टांतःकरणकरणोन्मूलनतटांनशिष्टस्त्वांप्राप्तः कलिगुणरणेमारणभटाम् १५

तिगृह्याणननुतथापिभटस्यानार्द्रचित्तत्वेशूराकरणवन्ममाप्यशिष्टशिष्टाकरणमेवेतिचेन्नतवतुसदार्द्रचित्तत्वमेवातएवान्येषा मस्तुवार्ताहरिरपिस्वपूजादिनैवेष्टंकालेददातित्वंत्वनूपकरुणादिनापूजादिनिरपेक्षद्वारापियथाकथंचिदस्थिसंपर्कादपिब्रह्मलो कंददानासर्वदेवोत्तमत्वंहरेरपिविलक्षणकरुणाब्धित्वंतीर्थत्वेनचतीर्थोत्तमत्वमपिप्रकटयति तथाचवाक्यं गंगातोयेषु यस्यास्थिक्षिप्यतेशुभकर्मणः नतस्यपुनरावृत्तिर्ब्रह्मलोकात्सनातनादिति तीर्थोत्तमत्वेचविवस्वद्वाक्यं एकतःसर्वती र्थानिजाह्नव्येकेवचान्यतः ब्रह्मलोकेपिशिरसःपतितायामहीतलमितिब्रह्मलोकदाना ब्रह्मणोप्यभिन्नैवेतिभावः १५

एवमादितोहरिगंगयोरैक्यत्वेन हर्य्यभिन्नगंगैश्वर्य्यवर्णनद्वारातत्स्तुतिनामभिरेवसकार्य्याज्ञाननिवृत्तिंयुक्त्यादिनाप्रार्थ्य पु
नस्तामेवातिदुर्लभामन्यानिच्छयाज्ञानप्रदहरिरूपगंगातः वेदाभिप्रायवर्णनेनयथामत्यर्थयते ऋतइत्यनेन हेगंगे ऋतेज्ञाना
न्नमुक्तिः तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेऽयनाय ज्ञानादेवतु कैवल्यमित्यादिश्रुतिभिर्ज्ञानादृते विनामुक्तिर्मोक्षोनभ
वतितद्विरोध्यज्ञानाच्चविनार्थाज्जननंजन्मादिकंचनभवतीतिमननंकृतंचकारानुकर्षात्तथैवान्यैरपिसर्वैर्वेदैर्मननंकृतंमननार्थं
निर्णयःकृतइत्यर्थः अतोयदज्ञानंप्रसिद्धमप्यप्रसिद्धंदुर्जयंचतवकृपामंतरातन्मारय निरपेक्षापि प्रयोजकरूपेण निमित्तमात्रं

ऋतेज्ञानाज्ज्ञानाद्भवतिनहिमोक्षोनजननं कृतंसर्वैर्वेदैरपगलितभेदैर्हिमननम्
अनन्तस्तज्ज्ञानावरणगुणवन्मारयरणे स्थितंकृत्वाहंतुंनुबहुकथयान्यंनचवृणे १६

भवसव्यसाचिन्निति यदुक्तामत्कृतसाधनैरेवनाशयेत्यर्थः ननुस्वतंत्रस्त्वमेवाज्ञानंदूरीकुर्विंतिचेन्न ददामिबुद्धियोगं
च येनमामुपयांतितेनाशयाम्यात्मभावस्थोज्ञानदीपेनभास्वतेति भगवद्वाक्यैरंतर्य्याम्यधीनत्वाज्ज्ञानस्यातस्तदभिन्नात्व
मेवाज्ञाननिवृत्त्याज्ञानंकुर्विंतिभावः ननुकिमपराद्धंतवाज्ञानेनयतोवारंवारमन्यानपेक्षयातन्नाशमेवेच्छसीतिचेत्तत्राह ज्ञाना
वरणगुणवदिति परोक्षापरोक्षज्ञानयोरुभयोरप्यसदावरणाभानावरणगुणाभ्यामाच्छादकमित्यर्थः अतएवसतितस्मिं १७
ल्लक्ष्यादर्शनद्वारासर्वानर्थकारणस्यनाशएवयुक्तः ननुसामान्यशत्रोरतिनाशोद्रोग्धुर्वैपरतोभयमिति हेतोरयुक्तइति

चेन्न हीदंसामान्यशत्रुरतरणे स्थितंचाततायिलक्षणयुतं ननु रणप्रेक्षकाततायिष्वपिनद्रोहाईइति चेदृंतुंमार्गाङ्क्षशयितुमेवस्थि
तमित्यर्थः ननुनाशयाम्यंतरेवज्ञानप्रदरूपेणेत्यत आह अनंतः कृत्वाबहिरेवकृत्वामारयांतस्तन्नाशेसूक्ष्मत्वेन तत्कार्येदेहे पुन
रपिस्थितिशंकातो बहिरेवेति भावः नन्वन्यमपीच्छस्यज्ञाननाशात्किंनेत्याह नु बहुकथयापिनुरलमोर्थेऽलमेवान्यमपिनवृ
णेसकार्याज्ञाननिवृत्त्यैव सर्वार्थसिद्धेरित्यर्थः ननुमूर्द्धाश्रुतिभिर्ज्ञानादेवाज्ञाननिवृत्त्यामोक्षसिद्धिविधानेपिसर्ववेदानामित्थ
मेवविधानमितिन संगच्छते तन्निर्णयस्यानेकप्रकारेणमोक्षविधायकत्वाद्यद्यपिज्ञानकांडेज्ञानादेवमोक्ष विधानंतथापि-
कर्मोपासनाकांडाभ्यांकर्मोपासनाभ्यामेवमोक्षप्रतिपादनात्कथंस्तुतिमात्रेणाज्ञाननिवृत्त्यामोक्षात्मकेष्टस्यमुख्यत्वेनया
चनंतवसंगच्छतेइतिचेन्न कर्मोपासनाकांडाभ्यामपिक्रमेणांतेज्ञानोत्पत्त्यैवमोक्षविधानादित्थमेवसर्ववेदनिर्णयविधिरि
त्यभिप्रायेणवेदान्विशिनष्टि अपगलितभेदैरितिव्यवहारेभेदप्रतिपादकत्वेपिपरमार्थेऽपगलितोनष्टस्तन्निर्णयेनभेदोयेभ्य
स्तैरित्यर्थः अत एवक्रमेणांतेज्ञानादज्ञाननिवृत्त्यैमुख्येष्टसिद्धिप्रार्थनंपुनः पुनरुपक्रमोपसंहारैक्यद्वारासंगच्छतइत्यभिप्रा
यः नचकर्मणैवहिसंसिद्धिमास्थिताजनकादयइतिवाक्यात्कथंस्वतंत्रेणकर्मणामोक्षोनेतिवक्तव्यमविद्यया मृत्युंतीर्त्वा विद्यया
मृतमश्नुतइतिश्रुतेरविद्योपासनयासंसारात्मकमृत्युंतीर्त्वा विद्ययाज्ञानेनैवामृतात्मकमोक्षविधानेनज्ञानांगोपासनावदु-
पासनांगत्वेनकथितस्यकर्मणः मोक्षेस्वातंत्र्याभावात् नचजनकादिषूभयविधिदर्शनाज्ज्ञानकर्मसमुच्चय एवास्तूभयवाक्या
विरोधेनशास्त्रसमन्वयस्यैवत्वदिष्टत्वादितिवाच्यं तेजस्तिमिरवत्परस्परविरोधित्वेनसहस्थितेरभावेसमुच्चयाभावादर्थात्

सर्वशास्त्रसमन्वयार्थंक्रमसमुच्चयेनैवजनकादिसिद्धेरुक्तेश्च नन्वस्तुकर्मणः उपासनांगस्य ज्ञानापेक्षया स्वतंत्रमोक्ष
साधनताभावः ज्ञानसमुच्चयाभावश्चोपासनायास्तु कचिद्गौणरूपायाज्ञानांगत्वेपिमुख्यायास्तुभक्त्यामामभिजानातियावा-
न्यश्चास्मितत्त्वतइत्यादिनास्वतंत्रमोक्षसाधनतास्त्येवेतिचेन्न नतोमांतत्त्वतोज्ञात्वाविशतेतदनंतरमितितत्रैवोत्तरार्द्धेनोपासनांगि
ज्ञानद्वारैवतन्मुख्यप्रवेशविधानात् ज्ञात्वादेवंसर्वपाशापहानिर्भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः क्षीयंतेचास्यकर्माणितस्मिन्
दृष्टेपरावरेयस्तुसर्वाणिभूतान्यात्मन्येवानुपश्यति सर्वभूतेषुचात्मानंततोनविचिकित्सतीत्यादिश्रुतिभिर्ज्ञानेनैवपाशादिविचिकित्सांता
नर्थनिवृत्तिविधानाच्च नचोपासनयापिसद्यएवसर्वानर्थनिवृत्तिरितिवाच्यमुपासकात्यनर्थनिवृत्तौजयविजयोर्वैकुंठात्पतनंनस्या
न्नचेश्वरवत्तद्भक्तानामपिपरार्थाविर्भावइतिवाच्यमृषिशापकृतजन्मानुत्पत्तेः क्वचिदीश्वरेपिशापकथनंतुतल्लीलयैवान्यव-
च्छापविषयत्वेतूपास्यत्वासिद्धेरुपासकमतासिद्धिःस्यादतोज्ञानांगत्वमुपासनायाःसर्वानर्थानिवृत्तेरपिसिद्धं क्वचित्सात्विक
मुख्यभक्तिविलक्षणानन्यनिर्गुणभक्तेरपिज्ञानाच्छ्रेष्ठविधानंतुपरोक्षज्ञानापेक्षयैवतत्रापिसाधनानन्यभक्त्यायत्किंचिदपरो
क्षेपुनःसाध्यानन्यभक्त्याह्यपरोक्षवैशद्योपपत्तावपरोक्षज्ञानस्यैवपाश्चात्येनमुख्यत्वंस्यादतएवभरतस्यपूर्वजन्मनिसाधना
नन्यभक्त्यायत्किंचिदपरोक्षस्यहरिणसंगाद्विस्मृतावपिपुनस्तत्फलेनतृतीयजन्मनिसाध्यानन्यभक्तिद्वारान्यसाधनादर्शनेन
ज्ञानवैशद्योपदेशेनरहूगणायापरोक्षज्ञानमुख्यत्वेनभक्तेःसर्वप्रकारास्वप्यपरोक्षज्ञानांगत्वमेवध्वनितंचरमजन्मन्येवसर्वप्र
कारायास्वपिभक्तेर्जन्मक्रमेणज्ञानांगत्वप्रतीतेः तथाचोक्तंभगवता बहूनांजन्मनामंतेज्ञानवान्मांप्रपद्यते वासुदेवःसर्व

मितिसमहात्मासुदुर्लभइति ननुपुनरपिक्रमेणैव ज्ञानोत्तरमर्जुनोद्धवाभ्यां भक्तेर्विधानाद्भक्तेरेवाधिक्यंपाश्चात्येनप्राप्तमि
तिचेन्नपाठक्रमादर्थक्रमोबलीयानितिन्यायादंतेपि भक्तिविधानंज्ञानार्थमेवा तएवोपनिषत्सुबुद्धीद्धबोधबोधेद्धबुद्धिविधा
नेनज्ञानसाधनानामग्रपश्चाद्भावत्वेपिज्ञानार्थत्वमेव क्वचित्कृतयुगादौबुद्धोसाधनेसति पूर्वमुपदेशसमकालमेवज्ञानं
प्रायेणरहूगणप्रभृतीनामभूदिदानींतुप्रायेणैवसाधनाशक्तौबोधोपदेशद्वारा ज्ञानवैशद्यार्थमेवबुद्धिरूपसाधनोप
देशइत्यभिप्रायेणप्रकटीकृतमतएव भक्तेरपिकर्मवत्स्वतंत्रमोक्षसाधनतानेति किंतु काशीमरणस्यतारकमंत्रार्थज्ञा-
नांगवज्ज्ञानांगत्वमेवास्तु ननुस्वतंत्रमोक्षसाधनताभावेपिभक्तिरूपोपासनाया ज्ञानेनसहसमुच्चयएवास्तुइतिचेत्सत्यंसा
ध्यानन्यतरभक्त्यासमुच्चयस्तद्विलक्षणयावा आद्यस्तुनाममात्रेणैवपरमार्थेब्रह्मेति परमात्मेति भगवानितिशब्द्यतइति भेद
वद्भेदात्सहसमुच्चयएवान्यथापूर्वरीत्यानेतिभावः तथाचोक्तंश्रीकपिलेनापिगुणैर्बहुभक्तिभेदंविधायांतेज्ञानयोगश्चमन्निष्ठोनैर्गु
ण्योभक्तिलक्षणः द्वयोरप्येकएवार्थो भगवच्छब्दलक्षणइत्यादिनामुख्यतरभक्तेर्ज्ञानेनैक्यमिति श्रीकृष्णेनाप्यार्तो जिज्ञा
स्वर्थार्थिभक्तेभ्यःसर्वोत्तमज्ञानि भक्तस्यज्ञानीत्वात्मैवमेमतमितिवाक्यादनन्यभक्तत्वेनप्रतिपादनद्वारा ज्ञानानन्यभक्त्योरैक्य
त्वेननाम्नाभिन्नयोःसाहचर्य्यमुक्तमस्त्येवमेवोद्धवायक्रमेणस्वप्राप्त्यर्थेनिर्विण्णानांज्ञानयोगोन्यासिनामिहकर्मसक्तेष्व
निर्विण्णचित्तानांकर्मयोगस्तुकामिनांननिर्विण्णोनातिसक्तो भक्तियोगस्य सिद्धिदइतिवाक्यात्सर्वाविरोधविधिनोत्तमाध
ममध्यमक्रमेणक्रमसमुच्चयद्वाराज्ञानादेवांतेमुक्तिंदर्शितवांस्तथार्जुनायापि आरुरुक्षोर्मुनेर्योगंकर्मकारणमुच्यते

योगारूढस्य तस्यैव शमः कारणमुच्यत इतिक्रमेणांते यज्ज्ञात्वा नेह भूयोन्यज्ज्ञातव्यमवशिष्यते येन भूतान्यशेषेण द्रक्ष्य-
स्यात्मन्यथो मयीति वाक्योक्तमुख्याभेदज्ञानादेव मोक्षं दर्शितवाँस्तथैव च श्रीरामचंद्रैरपि हनुमंतं प्रति पृष्टे ह्यविरोधनिर्णयेन मोक्ष
मार्गे हनुमद्भिः देहबुद्ध्या तु दासोहं जीवबुद्ध्या त्वदंशकः ब्रह्मबुद्ध्या त्वमेवाहमिति मे निश्चिता मतिरित्यनेन नाटके प्रतिपादितश्च सर्व
वेदाविरोधद्वारा क्रमसमुच्चयेन मोक्षमार्गः एवं निर्णयस्वीकारादेव पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवीति श्रुत्युक्त त्रि
पादप्राप्त्यात्मकात्यंतिकमोक्षसिद्धिरन्यत्र सापेक्षमुक्तावाविर्भावतिरोभावस्यापि क्रमसमुच्चयस्वीकारमंतरा कथितत्वादत एव
वात्यंतिकमोक्षेच्छुना यथाधिकारं कर्मादौ यतितव्यमित्थमेवापगलितभेदवेदनिर्णयः सर्वश्रेष्ठसंमतः स्वेष्टोपास्त्यादिना क
र्त्तव्यः एवं निर्णयेपि मुख्यज्ञानाभावे मध्य एव ज्ञानकथनमात्रेण भक्तिमुपेक्षंते ते तु ज्ञानाज्ञानसमुच्चयेन यथा ज्ञानबद्धा निं-
द्यास्तथैव परमेश्वरपरिचर्यादौ भोगासक्तत्वेनाशक्ता भक्तान्कामजेन क्रोधेन निंदमाना ईश्वरार्थकर्मेंद्रियोपरोधका मनसेंद्रि
यान्स्मरंतो मिथ्याचारा निंद्या एव तथाह भगवान्कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मरन् इंद्रियार्थान्विमूढात्मा मिथ्याचारः
स उच्यत इति एवं कर्मिणोप्यन्याति निंदया निंद्या भक्ताश्चापि मुख्यज्ञाननिष्ठादिनिंदका निंद्या एव यथाधिकारं क्रमसमुच्चय प
रित्यागेन मध्य एव परस्परनिंदया स्वार्थपरित्यागेन सर्वेषामपि वार्त्तापराणां शास्त्रेण चिंत्यत्वविधानात्तथा चोक्तं प्रल्हादेन-
श्रीनृसिंहाग्रे मौनव्रतश्रुततपोध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः प्रायः परं पुरुष ते त्वजितेंद्रियाणां वार्त्ता भवं
त्युत न वात्र तु दांभिकानामिति केचित्तु विधेयान्यनिंदा विधेयं स्तौति न त्वन्यान्निंदतीति शास्त्राभिप्रायमजानंतः साक्वि

कभक्त्यादिभिश्च स्वेष्टानन्यत्वातिदृढार्थं कृतां यत्किंचिन्निंदामजानानाः स्वकल्पनयैवानन्यावयमेव नास्त्यन्य ईश्वर व्यतिरिक्त उ
पास्योयेषामिति मत्वाचान्यानीश्वरावयवभूतान्देवान्निंदंति श्रीरामकृतामादित्यस्तुतिमगस्त्येन सर्वज्ञेनोपदिष्टां रावणवधार्थे
वाल्मीकेन पूर्वमेवादिकाव्ये ग्रथितामज्ञात्वा नस्तुवंति च ते तु स्थूलतरदृष्टय एवानन्यतानभिज्ञत्वादर्थादीश्वरांगदेवनिंदादिना
यथा ब्राह्मणपादपूजने पितच्छिर आद्यंगताडने ब्राह्मणाप्रसन्नतावदीश्वराप्रसन्नताद्वारेश्वरद्वेष्टार एव तथा चोक्तं भग
वता दक्षं प्रति यथा पुमान्न स्वांगेषु शिरःपाण्यादिषु क्वचित् पारक्यबुद्धिं कुरुते एवं भूतेषु मत्पर इति भूतेष्वपि पारक्यत्वे
न निंदादिनेश्वरपरत्वाभावे कुतो देवदेवांगदेवनिंदादिना परमेश्वराभक्तत्वेन तत्परत्वाभाव इति भावः येतु चिह्नोत्कर्ष
वर्णनेन स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नर इति भगवदुक्तधर्मसिद्धिमनादृत्य चिन्हमात्रधारणेन मोक्षमानिन
श्च ते तु स्थूलतमदृष्टय एव न लिंगं धर्मकारणमित्यादिमन्वादिवाक्यार्थानभिज्ञाः संतः ममैवांशो जीवलोके जीवभूतः स
नातनः सर्वभूतानि मनसा प्रणमेद्बहुमानयन् ईश्वरो जीवकलया प्रविष्टो भगवानितीत्यादिनोक्तमुख्यपूजामजा
नंतः ततोर्चायां हरिं केचित्संश्रद्धाय सपर्यया उपासत उपास्तापि नार्थदा पुरुषद्विषामित्युक्तपूजां पुरुषद्वेषेण फलामप्य
ज्ञात्वा सर्वधर्मस्थितपुरुषान्निंदमानाश्च शिवेश्वराभिन्नेपि वैष्णवानां यथा शंभुरितिवाक्येन वैष्णवत्वं परिकल्प्यापि शि
वमपूजयंतः वाक्यपूर्वापरार्थशून्यावयमेव भागवता इति मत्वा मुख्यभागवतान्वातरशनाब्रह्मशुकनारदसनकभरतन
वयोगेश्वरप्रभृतीनचिह्नांस्तदुक्त्यनादरणादिना निंदमानाश्चित्या एव अर्चायामेव हरये पूजां यः श्रद्धयेहते नतद्भक्ते

षुचान्येषु सभक्तः प्राकृतः स्मृत इत्युक्तप्राकृत भक्तेष्वप्यतिनिंदादिनागणितत्वाभानादितिभावः नचैवं परस्वरूपवर्णेनवापि
निंदकत्वमितिवाच्यं यज्ञार्थद्रुमच्छेदनादिष्वदोषवत्क्रमसमुच्चयसिद्ध्यर्थमन्यस्वरूपमात्रकथनेनानाध्यैयादोषाभावाद
थचैवं क्रमेणांतेज्ञानान्मुक्तिरितिसर्ववेदनिर्णयेनयथाधिकारं यतितव्यमनिंदयेतिभावः ननुवेदवाक्यैरेवंज्ञानादंतेमु
क्तिसिद्धावपिवेदज्ञानांजैमिनिप्रभृतीनामभेदज्ञानविलक्षणस्वाभिमतज्ञानमुक्तिसिद्धिर्मतातः कथंकर्मोपासना-
क्रमेणांते परमाभेदज्ञानादेवमुक्तिरितिसंगच्छत इतिचेन्मूले वेदैरित्यत्रार्श आद्यचिकृतेहीत्यव्ययंसंबंधेच वेदैर्नो
मवेदज्ञैरपिहिनिश्चयेन परमार्थपराभेदज्ञानादेवात्यंतिकमोक्षमननं कृतं कथंतर्हि कर्मब्रह्मेत्युपासीतेति श्रुतेः क
र्मरूपब्रह्मज्ञानान्मीमांसकमतमोक्षवर्णनमितिचेदादौ कर्मब्रह्मज्ञानात्साधारणमोक्षमात्रकथनेप्यंतेतु जड
कर्माधिष्ठानाभिन्नपरज्ञानादेवात्यंतिक मोक्षविधानं तेषामस्ति परांगं चात्मविज्ञानादन्यत्रेतिवाक्यादात्मज्ञा
नांगिनैवात्यंतिकमोक्षेपि मध्ये कर्मांगिज्ञानात्क्वचिन्मोक्षविधानं तु सर्वत्रासक्तानां कर्मज्ञानात्कर्मासक्तानां च
तल्लक्ष्ये परब्रह्मणि चित्तावतारायैवान्यथा सर्वज्ञजैमिन्यादिमीमांसकानां कथमन्यथावर्णनं वर्णनेचान्यवेद
वाक्यविरोधेस्वस्यैवासर्वज्ञत्वेनानिष्टापातः स्यादतः पराभेदज्ञानादेवांतेमुख्यमुक्तिरितिभावः तथैव शाब्दिका
अपिपाणिन्यादयः वागेवेदंसर्वमितिश्रुतिमाश्रित्यसर्वस्याष्टस्फोटात्मकवागाभिन्नत्वप्रतिपादनद्वारायन्मनसो २०
मनोवाचोहवागितिश्रुतिबोध्यवागाद्यधिष्ठानज्ञानादेवस्थूलारुंधतिन्यायेनमोक्षंदर्शयामासुरथांत्यश्रुत्यस्वीकारे

तु सन्नियोगशिष्टपरिभाषयातन्मतश्रुतिहानिरपिस्यान्मध्येवाङ्मुख्यवर्णनंत्वत्राप्यन्यत्रवाचिचासक्तानांशनैर्वागल्-
क्ष्येचित्तप्रवेशार्थमेव तथै वोपनिषत्सु सूर्य्यज्योतिषोऽभावेचंद्रज्योतिस्तदभावेतारकाज्योतिस्तदभावेग्निज्योतिस्तद-
भावेवाग्ज्योतिस्तदभावेचात्मज्योतिरित्यात्मज्योतिर्ज्ञानादेवमोक्ष इतिस्फुटंनचात्मनोप्यभावेशून्यमेवास्त्विति वाच्यंशून्य
साक्षित्वेनतदभावाभावादित्यर्थः नचस्वविलक्षणवागाद्यधिष्ठानज्ञानादेवमोक्ष इतिवाच्यंतत्वमसिश्वेतकेतोएकमेवाद्वि-
तीयंब्रह्मेत्यादिश्रुतिभिः स्वाभिन्नाधिष्ठानज्ञानादेवस्वभिन्नज्ञानेव्यवहारसत्वेसिद्धसाधनंपरिहृत्यमोक्षविधानात् नचाद्वि
तीयमित्यत्रनद्वितीयमद्वितीयमिति तत्पुरुषेद्वैतभिन्नत्वेननद्वितीयंद्वैतंयस्मिन्निति बहुव्रीहौच द्वैताभावाभावत्वेनाद्वैतासि
द्धिरितिवाच्यंप्रातीतिकद्वैतस्यतद्भिन्नत्वेनतदभावाभावत्वेनाद्वैतनाशकत्वाभावादाकाशनीलतातदभावाभ्यामाकाशस्यैवे
त्यर्थः तथैवतार्किकाअपिद्वासुपर्णासयुजा सखायासमानंवृक्षंपरिषस्वजाते तयोरन्यः पिप्पलंस्वाद्वत्त्यन्योऽनश्न
नभिचाकशीतिश्रुतिमादायात्मभेदंमत्वांतेजहदजहल्लक्षणयाभेदमेववस्तुतः नेहनानास्तिकिंचनेतिश्रुतेर्नानात्वनिषे
धेनमोक्षार्थंवर्णयामासुः नचनानात्वनिषेधेनाभेदश्रुत्यर्थोन्यथैवेतिवाच्यं तथैवभेदश्रुत्यर्थकरणेपरमार्थेचाभेदए
वस्यादद्वैतश्रुतेः स्वमतेऽस्वीकारेचविशेषणाभावन्यायेनद्वैतश्रुतेरप्यस्वीकारएवस्यादभेदमतस्यापिपरमार्थे पु-
नरस्वीकारेचप्रातीतिकसत्वोद्बोधकत्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकात्यंताभावस्यभूतलेघटोनास्तीत्यु
दाहरणंसतिघटेनस्यादत्यंताभावास्वीकारेचस्वमतहानिःस्यात् ननुसत्यपिघटेघटात्यंताभावाप्रतीतिः कालादिसा

गं·स्तो· मप्य भावादेवास्य तु बहुधा परंपरा गतनानाप्रपंचस्यात्यंताभावाप्रतीतेः कथमद्वैतसिद्धिरितिचेदस्याप्यत्यंताभावप्रती टी·
२१ तिः सतिज्ञाने शुक भरतादिष्विवस्यान्नचैवमभेदेप्यारंभवादे कारण भेदाद्भेदइतिवाच्यम विद्यया मनसाकल्पितास्तइति
वाक्यादारंभकपरमाणूनां कल्पितत्वान्नच परमात्मव्यतिरिक्त कल्पितकारणेन भेदः स्यात् व्यवहार भेदस्तु मध्ये न्य
त्रासक्ति निरासार्थमेवेति दिक् सांख्या अपीत्थमेवा जामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां नमाम इति
श्रुतिमादायात्मा पुष्कर पलाशवन्निर्लेपः प्रकृतिः कर्त्रीति मतेन परमात्मनो निर्लेपः तावत्पंचविंशति तत्वपक्ष मिषेण
तदन्यकल्पनापार्थेतिवाक्याज्जीवात्मनोपि निर्लेपत्वेनाभेदज्ञानादेवमोक्षं वर्णयामासुः नच प्रकृति कर्तृत्वेन तया
द्वैतमस्त्विति वाच्यमीक्षतेर्नाशब्दमिति सूत्रात्स ऐक्षत एकोहं बहुस्यां प्रजायेयमयाध्यक्षेण प्रकृतिः सूयते सचराचरमि
तिन्यायश्रुतिस्मृतिभिरात्मसत्तया जडायाः कर्तृत्वेप्ययस्कांतवन्निर्लेपात्मनो बाधिकया वस्तुतो निर्वचनया कथंद्वैत
त्वंस्वतः कर्तृत्वे परिणामवादे परिणता परिमाणेच सदा देहाकार प्रकृतिस्थितो ह्यनिर्मोक्ष प्रसंगादतो मध्ये त्वत्रापि मा
यायाः कर्तृत्वमुख्यत्वं निर्लेपात्म प्रथम कर्तृत्व मुख्यत्ववदतो व्याघात निवृत्त्यान्यत्रासक्ति निरासार्थमेव योगा अपी
त्थमेवादौ चित्तवृत्ति निरोधो योग इति सूत्रेण योगमुपवर्ण्य पश्चाद्योगांगतदधिकारिणो दर्शयंतोऽ तेपरसमाधौ चो
पासकस्य नहि द्रष्टुर्दृष्टेर्विपरिलोप इति श्रुतेर्ज्ञानात्मक दृष्टेर्नित्यत्वं विधाय यावद्दृष्टिभेदेपि वृत्त्यभावे किंभूतो दृष्टेतिप्र २१
श्नद्वारा तदाद्रष्टुः स्वस्वरूपेवस्थानमिति परमसूत्रेणोपास्योपासकाभेदज्ञानादेवांते मोक्षं दर्शयामासुरत्रापियोगादि

मुख्यवर्णनंत्वन्यत्रदृष्टिनिरासार्थमेवेतिभावः पौराणिकाअपिदशमस्य विशुद्ध्यर्थंनवानामिहलक्षणमितिवा-
च्यान्नवलक्षणलक्षितदशमाश्रयाभिन्नज्ञानंमोक्षकर्त्रीतिवर्णयंतिनचाश्रयाद्भिन्नोजीवस्तयोर्भिन्नज्ञानादेवमोक्षइतिवा
च्यंयावदज्ञानंभेदेपि यथानभसिमेघौ घोरेणुर्वापार्थिवोनिले एवंद्रष्टरिदृश्यत्वमारोपितमबुद्धिभिः पश्येमयिब्रह्मणिक
ल्पितंपरेचेत्युपक्रम्य घटेभिन्नेयथाकाश आकाशःस्याद्यथापुरा एवंदेहेमृतेजीवोब्रह्मसंपद्यतेपुनरित्येवंभागवतादि-
ष्वभेदज्ञानमोक्षार्थोपसंहारदर्शनान्मध्येभावाद्वैतंक्रियाद्वैतंद्रव्याद्वैतंतथात्मनः वर्तयन्स्वानुभूत्येहत्रीन्स्वप्नान्धुनुतेमु
निरित्यादिनाद्यभेदविधानान्नचान्यदपिमध्येइतिवाच्यंतद्वर्णनस्याध्यारोपस्यापवादेस्वभेदावशेषणत्वादभेदज्ञानादेव-
मोक्षइतिसिद्धं तथामुख्याहंग्रहोपासनबोधकश्रुतयोपि सदारामोहमित्येतत्तत्वतःप्रवदंतिये नतेसंसारिणोनूनंरामए
एवनसंशयः आत्मानंगोपालोहमितिभावयेदात्मानंनृसिंहोहमितिभावयेद्धिरण्मयेनपात्रेणसत्यस्यापिहितंमुखम् यो
सावादित्येपुरुषःसोसावहमित्याद्याः तापनीयेशावास्योपनिषत्स्वभेदज्ञानादेवात्यंतिकमोक्षंकथयंतिस्मृतयोपिजीवस्यचेश्व
रज्ञानाद्विशुद्धिः परमामतेत्यादयोजीवद्रव्यमुमुक्ष्वाद्यभेदज्ञानादेवमोक्षमिच्छंतिनत्वेश्वरपृथक्ज्ञानादेवमुमुक्षामोक्षइ
तिवाच्यमात्मात्मविद्ययेतिविशेषबुद्धिविधानाद्विद्यात्मनिभिदाबाधइति विद्यास्वरूपस्येश्वरेणविधानाच्च तथान्ये
षांज्योतिर्वित्तांत्रिकादीनामपिसर्वेवेदायत्पदमामनंतीतिश्रुतेः कालोपास्यादिभिःसर्वाभिन्नवादिनामुत्पत्तिभूतशु
द्ध्यादावभेदज्ञानादेवसर्वेषामात्यंतिकमोक्षोन्यमोक्षापेक्षयामतः साक्षात्परंपरयाचसर्ववाक्यसमन्वयेनेतिभावःनचवे

गं॰स्तो दवेदज्ञानांमुख्यानामभेदज्ञानान्मोक्षनिर्णयेपिमीमांसकाद्यनुयायिनांपुनरपिस कथंनोमतोतः परंपरयागुरुशिष्यैक- टी॰
२२ ज्ञानाच्छुद्धभेदज्ञानादेवमोक्षइतिवाच्यं नबुद्धिभेदंजनयेदज्ञानांकर्मसंगिनाम् जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्नि-
त्युक्तेर्यावत्कर्माधिकारंक्रमज्ञानेच्छयासर्वज्ञमीमांसकादीनांकारकाणामभेदबोधकरणस्यानौचित्यादज्ञेष्वित्यर्थः यद्वा
कृतेपिक्वचिदुपदेशेब्रह्मकृतेंद्रविरोचनोपदेशवदधिकारिष्वेवज्ञानसंप्रदायान्यथानुपपत्त्याफलितत्वात् यद्वात्रिलोकज
नेनब्रह्माणं प्रतिपृथक्कल्याणेपृष्टेब्रह्मणात्वददददइतित्रिरुक्तेत्रिलोकस्यापिसर्वत्रदानादिष्वधिकारेपियथासंस्कारद-
यादानदमनान्यरोचयँस्तथापरोक्षापरोक्षाभ्यामपिक्वचिदुपदेशेतदनुयायिनांसर्वप्रकारज्ञानस्यापिशास्त्रेलिखित
त्वाद्भेदादिष्वभिरुचिरस्तिनाल्पस्यतपसः फलमिति भारतादल्पतपोवतां तत्राभेदज्ञानसाध्यमोक्षार्थेचाप्रवृत्तेरित्यर्थः न
चसत्यप्यात्मज्ञानेपापयुक्तस्यकथंमोक्षइत्यपिवाच्यंसतिज्ञानेपापानवकाशाद्यद्वाप्यपिचेदसिपापेभ्यः सर्वेभ्यः पापकृत्त
मः सर्वज्ञानप्लवेनैववृजिनंसंतरिष्यतीतिवाक्येनप्रबलकर्मणासत्यपिपापेपापतरणस्यसर्वस्यापिज्ञानादेवविधानान्न
चपापतरणेसमुद्रवदवशिष्यतएवेतिवाच्यंयथैधांसिसमिद्धोग्निर्भस्मसात्कुरुतेर्जुन ज्ञानाग्निः सर्वकर्माणिभस्मसात्कु
रुतेतथेति निःशेषाज्ञाननाशस्यापिविधानादेतदंतेच नहिज्ञानेनसदृशंपवित्रमिहविद्यतइत्यनेन पूर्वमन्यसाधनश्रेष्ठ
त्वेप्यन्तेज्ञानस्यैवपवित्रतानत्वात्मनिश्वानेकजन्मकृतक्रमसाधनादेवतत्स्वयंयोगसंसिद्धः कालेनात्मनि विंदतीत्यनेनक २२
थिता ननुवेदवेदज्ञनिर्णयेनाज्ञाननिवृत्त्यास्तुज्ञानादात्यंतिकमोक्षसिद्धिः पूर्वाभिमतोपास्यकृपयावेदस्यप्रामाण्येन

त्रैवमानंनेतिचेन्नेश्वरश्वसितत्वेनवेदस्यप्रामाण्यात्तथाचश्रुतिः अस्यमहतोभूतस्यनिश्वसितमेतद्यदृग्वेदोयजुर्वेदःसा
मवेदइति नचेश्वरस्यापिवेदोक्तत्वात्कथंप्रामाण्यंपरस्परप्रामाण्येचान्योन्याश्रयइतिवाच्यंपरारूपवेदस्येश्वराभिन्नत्वे
नान्योन्याश्रयनिरासादभेदेचात्माश्रयइतिचेन्नाभिकंठाद्युपाधिभेदात्परावैखरीभेदेनतस्यापिनिरासात् नचेंद्रादिश
रीराणामनित्यानामिंद्रायस्वाहेत्यादिमंत्रैः प्रतिपादकत्वेनवैखर्य्यात्मवेदानित्यत्वेपरारूपस्याप्यनित्यत्वमुभयोरेक-
त्वात्स्यादितिवाच्यमिंद्रादिनिष्ठनित्यचैतन्यप्रतिपादकत्वादनित्यत्वानापत्तेः नन्वेवंरीत्यावेदस्यनित्यत्वेनतदुक्तात्म
नोरभेदज्ञानादस्तुमोक्षस्तथाप्यदृष्टयोः कथमभेदोदृश्यत्वेचानित्यतेतिचेन्नशास्त्रानुभवाभ्यांदृश्यत्ववत्त्वेपिसर्वदा
द्रष्टृत्वेनादृश्यताद्वाराद्यनित्यत्वाभावादभेदःस्यात्तथाहि एकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांतरात्माईश्वरः
सर्वभूतानांहृद्देशेर्जुनतिष्ठतीत्यादिश्रुतिस्मृतिभिः क्षित्यंकुराद्यन्यथानुपपत्त्याचेश्वरसिद्धौतस्येश्वरस्यश्रीरामकृष्णा
दिरूपदर्शनश्रवणेनदृश्यत्ववत्प्रतीतावपिमाययाद्रष्टृत्वमेव यतोवाचोनिवर्त्तंतेअप्राप्यमनसासहेतिश्रुत्याद्यदृ-
श्येश्वरविलक्षणंजीवस्यापिदृश्यतेत्वग्र्ययाबुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभिरितिश्रुतेर्बुद्ध्यवच्छिन्नत्वेनदृश्यत्ववदना
पिप्रतीतौवस्तुतोदृष्टत्वमेवातएवमृद्घटयोरिवदृश्ययोरेवाभेदमतेपिशास्त्रानुभवादिभिस्तयोःप्रतीतिमात्रेण
व्यवहारेप्यभेदेकुतस्तरांद्रष्टृत्वेनाभेदोनेतिभावः नन्वेकत्रद्रष्टृत्वदृश्यत्वयोः कथंसमावेशइतिचेज्जीवेश्वररूपेण
दृश्यद्रष्टृपरपर्यायभानाभानयोरेवयथावज्ज्ञानार्थंशास्त्रेऐकत्रसमावेशविधानादभेदएवस्यादितिभावः त

थाचोक्तं गीताया माश्चर्य्यवत्पश्यति कश्चिदेनमाश्चर्य्यवद्वदति तथैव चान्यः आश्चर्य्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं
वेद न चैव कश्चिदिति जीवत्वेन भाने दर्शनादिकमीश्वरत्वेनाभाने चादर्शनादिकमिति विभागः स्फुटमपि क्षेत्रज्ञं चापि मां
विद्धि सर्वक्षेत्रेषु भारतेति भगवदुक्तेरभेद एव अन्यत्र च पुत्राध्ययनादिशब्ददृष्टांतेन अतो भानेप्यभातासौ परमा
नंदतात्मन इत्यनेनोभयरूपेण भानाभानविधानादेकत्वमेवस्यात्सनत्कुमारोपि पृथुं प्रति देहेंद्रियासुधिषणानि चरंति ये
न संजीवितानि तदवेहि परं नरेंद्र यः क्षेत्रवित्तपतया हृदि विष्वगाविः प्रत्यक्चकास्ति भगवांस्तमवेहि सोस्मीत्यनेन पू
र्वापररूपेणाभेदमेवावोचत्प्रल्हादोपि बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः तायेनैवानुभूयंते सोध्यक्षः पुरुषः
पर इत्यनेन जीवस्याध्यक्षत्वेनाभेदमकथयत्तादृशात्माभेदप्रतीतिस्तु सन्नेयदिंद्रियगणेहमिच प्रसुप्ते कूटस्थ आशय
मृते तदनुस्मृतिर्न इति नवयोगीश्वरोक्तेस्तादृशानामेवेत्यर्थः नन्वसदेव सोम्येदमग्र आसीदिति श्रुतेः सर्वांते चाभव
स्यैवावशिष्टत्वात्तज्ज्ञानादेवास्तु मोक्ष इति चेन्न तस्यापि ससाक्षिकत्वात्साक्षिणोप्यन्यसाक्षित्वमिति चेन्न ह्यनवस्थापा
तादतः कल्पितसर्वांते तत्साक्षिभूतात्मनोरभेदज्ञानादेवात्यंतिकमोक्ष इति सिद्धं न च कल्पितसर्वाभावेन पुनरद्वैतासिद्धिरि
ति वाच्यं प्रातीतिकसत्वेन कल्पितपदार्थस्यैव मिथ्यात्वे तत्प्रतियोगिकाभावस्तुत्यादेव रज्जुसर्पाभाववन्मिथ्या न चान्यत्र
सत्यस्यान्यत्र कल्पितत्वनियमादस्य सर्वस्यात्मनि कल्पितत्वेप्यन्यत्र सत्यत्वे तेन पुनरद्वैतासिद्धिरिति वाच्यं धिनगमनाभावा

दंधपरं परयेतिश्रुतेश्चसर्वत्र मिथ्यापदार्थस्यापिगवादिशृंगकार्य्यंशशशृंगस्याप्यन्यशशशृंगेषुकारणत्ववत्क्वचित्प्रतीतेः
नचगवादिसच्छृंगस्यैवस्वसंस्कारेणपूर्वमिथ्याशशशृंगद्वारान्यशशशृंगेषुकारणत्वमित्यपिवाच्यंसजातीयपदार्थेषु
पूर्वपदार्थस्यस्वसंस्कारद्वाराकारणत्वेपिसदसतोःपरस्परंस्वभावान्यथानुपपत्त्यापरस्पर प्रवेशेनकारणत्वाभावात्त-
थाह भगवानेवनासतोविद्यतेभावोनाभावोविद्यतेसतः उभयोरपिदृष्टोंतस्त्वनयोस्तत्वदर्शिभिरितिनचसर्वस्य मि-
थ्यात्वे कथंतेनव्यवहारइतिवाच्यं कूटकार्षापणादिनापिव्यवहारदर्शनात् नचसर्वमिथ्याप्रतिपादकवाक्येन
सर्वब्रह्मप्रतिपादकवाक्यस्यविरोधे पुनरभेदाभाव इतिवाच्यं रज्जुकल्पितसर्पस्य प्रतीतिमात्रस्यापि पृथक्कल्पने
मिथ्यात्वमधिष्ठानातिरेके तदभिन्नत्वेनतद्रूपत्ववत्सर्वस्य पृथक्कल्पनेन मिथ्यात्वकथने प्यधिष्ठानाभिन्नत्वेन तद्रू
पत्वादविरोधद्वाराह्यभेदएवमध्यमोत्तमयोरर्थेस्यादतएवसर्वंखल्विदंब्रह्मनेहनानास्तिकिंचन सर्वंविष्णुमयंज
गदित्यादिश्रुतिभिर्मध्यमानामनेकजीवमतएवबाधसामानाधिकरण्येनदर्शितेप्यभेदज्ञानान्मोक्षेसर्वोत्तमानांचा
र्थे एकमेवाद्वितीयंब्रह्मेतिश्रुतेः साक्षात्परमार्थंदर्शयन्कृष्णावतारे ब्रह्मणापहृते वत्सादि पदार्थे पूर्ववत्सादिसर्व
करणेनांतेच विज्ञप्तिरूपकरणेनतदंतेलक्षितलक्षणयाप्यवचनेनैवप्रोवाचेतिश्रुत्यभिप्रायदर्शनेन सर्व-
स्याप्यत्यंताभेदेनसर्वान्यश्रुत्यविषयमुख्यसामानाधिकरण्यमप्यर्थाद्दर्शितवान्ब्रह्मणे भगवानितिगूढाभि

संधिः तादृशसामानाधिकरण्यप्रतीतिरपिब्रह्मतत्सदृशानामेवात एवाभेदज्ञानान्मोक्षेनाश्रद्धातव्यंश्रद्धयैवक-
मेणांतेजन्मन्यत्यंताभेदज्ञानाच्छांतिरूपमोक्षाप्तेः तथाह भगवान् श्रद्धावाँल्लभतेज्ञानंतत्परःसंयतेंद्रियः ज्ञानंलब्ध्वापरा
शांतिमचिरेणाभिगच्छतीति श्रद्धस्वतातेति छांदोग्यश्रुतेश्च श्रद्धस्वैतन्मतंमह्यंजुष्टंयद्ब्रह्मवादिभिरिति कपिलोक्तेश्च स्थूलदृ
ष्ट्यापिमिथ्यावासुदेवस्यांतेवासुदेवोहमितिश्रद्धयाप्राचीनकर्मसंस्कारद्वारावासुदेवरूपप्राप्तौकुतः सूक्ष्मदृष्ट्याश्रद्धयात
त्प्राप्तिर्नेतिभावः नन्वस्तुज्ञानान्मोक्षःश्रद्धयैवतत्प्राप्तिरितिकोयंनियमइतिचेदश्रद्धयातदप्राप्त्यामहदनिष्टापत्तेः तथाह -
भगवानेव अज्ञश्चाश्रद्दधानश्चसंशयात्माविनश्यति नायंलोकोस्तिनपरोनसुखंसंशयात्मन इतिनचश्रद्धया विज्ञप्तिमा
त्रज्ञानान्मोक्षे विज्ञानवादमतप्रवेश इत्यपिवाच्यं तस्यक्षणिकत्वेननिषेधितत्वात्तदष्टादशभेदवादतद्विकल्पानांच-
जितेराजनिभृत्यजयवत्क्षणिकत्वेन विज्ञानवादनिरासेनतज्जयद्वारानिरस्तत्वान्नित्यविज्ञप्तिज्ञानान्मोक्षइति
सर्ववेदवेदज्ञनिर्णयः विज्ञप्त्यतिरिक्तस्यसर्वस्यापिमिथ्यात्वेज्ञानगुणकादिमतान्यपिचिंत्यानीति दिक्
१६ ७ एवंषोडशभिः श्लोकैरसैरुद्रैरंते भवतिविरतिः साशिखरिणीत्युक्तछंदोलक्षणवद्विजलाकृति
हरिमुपवर्ण्याज्ञाननिवृत्त्यैवसर्वार्थसिद्धिमवलोक्यस्तुतिरूपप्रार्थनयातामेवसर्वशास्त्रस्ययथामतिस २४
मन्वयेनप्रार्थ्यजलाकृतिहरेरेवाथपूर्वमर्यादामवलोक्यस्तोत्रफलमपिकथयति ७

इदमित्यनेनयोविमदोनमाकृतंपठेदितिमदरहितः बालादपिस्फभाषितमितिमनूक्तिमाश्रित्येदंअष्टश्लोकंस्तोत्रंद्विगुणा अष्टौ
श्लोकायस्मिँस्तत्पठतिगंगाश्रद्धयागंगायाइतिशेषः तत्तस्यसागंगाह्यज्ञानंदहतिज्ञानंचकुरुत इत्यन्वयः कथंभूतमज्ञानमज्ञा
नमार्तिभयदं आर्तिश्चभयंच आर्तिभयेतेददातीतितत्तूज्ञानंचकिंभूतंतेचार्तिभयएवइत्यवखंडयतीतितदित्यर्थः तथाचद्विती
याद्वैभयंभवत्युदरमंतरंकुरुतेथतस्यभयंभवतीत्यादिश्रुतयोपिद्वैतहेतुकाज्ञानादेवार्थोदार्तिभयादिकंतद्विरोधिज्ञानाद

इदंअष्टश्लोकंपठतिविमदोद्राक्सुमतिदं तदज्ञानंज्ञानंदहतिकुरुतेसार्त्तिभयदम्
स्वदाद्वंगास्तोतॄन्फलमितिमयाज्ञायरचितायथाबुद्धिस्तोत्रंस्तुतिरथतयास्यात्समुदिता १७
इतिगंगास्तोत्रंसमाप्तम् ॐ श्रीगंगार्पणमस्तु ॐ

र्थादेवात्राभयादिकंप्रतिपादयंति तस्मात्त्वमेवस्वस्तुतिस्तोत्रपाठेनाप्यज्ञाननिवृत्तिपूर्वकंज्ञानममान्येषांचकुर्विति प्रार्थना
भावार्थः यत स्तोत्रंस्फमतिदंस्फुष्टुस्फतरांवागंगायायथार्थरूपविषयणींमतिंस्वार्थावलोकनेनददातीतितदित्यर्थः पूर्वाचा
र्य्यकृताष्टकपक्षत्यागेनद्विगुणाष्टकविधानंत्वत्रब्राह्मणोद्विगुणंकुर्य्यादितितंत्रोक्तिमादायकलौद्विगुणस्तोत्रादिनैवेष्ट
सिद्धेः शीघ्रतार्थमिति भावः ननुगंगातुस्वस्नानादिनैवेष्टकर्त्रीकिंतत्स्तुत्येतिवाच्यं पूर्वस्तुत्यैवतत्स्नानादिप्राप्तेरित्याह

र्द्देन गंगा पूर्वं स्वस्तोतृनेव भगीरथादीन्प्रति फलं दर्शनस्पर्शनस्नानादिना स्वाभीष्टरूपं स्फुतरामदात् स्तुतिमंतरा स्नाना
दिनामोक्षश्रवणमपि पूर्वजन्मकृतस्तुतिपूर्वकमेवेति मयाप्याज्ञाय सम्यक् श्रवणेन ज्ञात्वा यथाबुद्धि स्तुतिस्तन्मीति द्वारास्व
कल्याणार्थे रचितातोऽन्यथा स्तुत्यापि पुत्राय यथा शब्देन मातृवत्सुतरां मुदितास्यात्तन्मोदादेव स्वेष्टप्राप्तिसिद्धेरिति भावः पूर्वाचा-
र्य्यकृतस्तुतिसमूहे सति नूतनरचनमपि शीघ्रमेव गंगाप्रसन्नार्थमित्यर्थः १७ दह देहि ममाज्ञानं ज्ञानं ज्ञानस्वरूपिणि कुरु
ते चरणे चित्तं चरे यच्छं चराचरे १ संविल्लक्ष्ये यथा पादे धृतचित्तः शिवे शिवे शिवाशिवजनेर्ष्यादीनाणयेन तथा कुरु २
गणनागणने गंगे गण्यैर्ज्ञेयेन ज्ञानतः परेतु तदपि त्वं मे द्वंद्वानां देहि देवते ३ कृतार्पणेन पूर्वेण कर्मणो हि क्रमेण च यथा
योग्यं हि कामं मे पूरयार्णव पूरणे ४ इतिश्री अष्टश्लोकं प्रकरणं समाप्तम् ७ ७ ७

पंडितजीश्री १०८ महाराज तुळसीरामजी चिडावा ग्रामनिवासी श्रीगंगाजी महाराणीकी प्रसन्नताके अर्थ विद्वा
नांके हर्षका करणेवाला अष्टक प्रगट किया अपाणीबुद्धिके अनुसार तत्पुत्र पंडित मथुरादत्तन ममाई मध्ये जगदीश्व
र छापाषानेमे छपाया संवत् १९३४ मे.

इतिश्री गंगास्तोत्रं समाप्तम् ॥